# MASTERS OF ARTS
# IN
# SANSKRIT

## SYSTEMS OF INDIAN PHILOSOPHY-I

**Paper-3**

UTKAL UNIVERSITY
NAAC ACCREDITED A+
DDCE
Education for All

**UTKAL UNIVERSITY**

**VANI VIHAR, BHUBANESWAR, ODISHA-751007**

**Name of the Study Material:** Systems Language & Literature

**Author Name:** पं. ईश्वरचंद्र शास्त्री

Edition: 2019

Copyright © Laxmi Publications Pvt Ltd.

No part of this publication which is material protected by this copyright notice may be reproduced or transmitted or utilized or stored in any form or by any means now known or hereinafter invented, electronic, digital or mechanical, including photocopying, scanning, recording or by any information storage or retrieval system, without prior permission from the publisher.

Information contained in this book has been published by Laxmi Publications Pvt Ltd and has been obtained by its authors from sources believed to be reliable and are correct to the best of their knowledge. However, the publisher and its author shall in no event be liable for any errors, omissions or damages arising out of use of this information and specially disclaim and implied warranties or merchantability or fitness for any particular use.

**Printed and Published by:**
**Laxmi Publications Pvt Ltd.**
113, Golden House
Daryaganj, New Delhi-110 002.
Tel: 011-43532500, E-mail: info@laxmipublications.com

**For:**
**Directorate of Distance & Continuing Education**
Utkal University, Vaniihar, Bhunabeswar-7, Odisha
Email: helpline@ddceutkal.ac.in
Website: www.ddceutkal.ac.in

DUT-6527-84.68-SYS IND PHIL-I P-3 SNK C–
Typeset at: Friends Enterprises, Delhi Printed at:

**DIRECTORATE OF DISTANCE & CONTINUING EDUCATION**
**UTKAL UNIVERSITY : VANI VIHAR**
**BHUBANESWAR-751007**

# From the Director's Desk

The Directorate of Distance & Continuing Education, originally established as the University Evening College way back in 1962 has travelled a long way in the last 52 years. 'EDUCATION FOR ALL' is our motto. Increasingly the Open and Distance Learning institutions are aspiring to provide education for anyone, anytime and anywhere. DDCE, Utkal University has been constantly striving to rise up to the challenges of Open Distance Learning system. Nearly one lakh students have passed through the portals of this great temple of learning. We may not have numerous great tales of outstanding academic achievements but we have great tales of success in life, of recovering lost opportunities, tremendous satisfaction in life, turning points in career and those who feel that without us they would not be where they are today. There are also flashes when our students figure in best ten in their honours subjects. Our students must be free from despair and negative attitude. They must be enthusiastic, full of energy and confident of their future. To meet the needs of quality enhancement and to address the quality concerns of our stake holders over the years, we are switching over to self instructional material printed courseware. We are sure that students would go beyond the course ware provided by us. We are aware that most of you are working and have also family responsibility. Please remember that only a busy person has time for everything and a lazy person has none. We are sure, that you will be able to chalk out a well planned programme to study the courseware. By choosing to pursue a course in distance mode, you have made a commitment for self improvement and acquiring higher educational qualification. You should rise up to your commitment. Every student must go beyond the standard books and self instructional course material. You should read number of books and use ICT learning resources like the internet, television and radio programmes etc. As only limited number of classes will be held, a student should come to the personal contact programme well prepared. The PCP should be used for clarification of doubt and counselling. This can only happen if you read the course material before PCP. You can always mail your feedback on the course ware to us. It is very important that one should discuss the contents of the course materials with other fellow learners.

We wish you happy reading.

**DIRECTOR**

# vuØef.kdk


| इकाई | | पृष्ठ संख्या |
|---|---|---|
| 1. | सांख्यकारिका – 1 | 1 |
| 2. | सांख्यकारिका – 2 | 39 |
| 3. | वेदान्तसारः – 1 | 63 |
| 4. | वेदान्तसारः – 2 | 83 |
| 5. | प्रत्यभिज्ञा–दर्शनम् | 99 |

## Paper-3. Systems of Indian Philosophy-I

Unit-I and II. Samkhya-karika (Complete text)
Unit-III and IV. Vedantasara (Complete text)

Unit-V Pratyabhijna-darshana (from Sarva-darshana-samgraha)

**Books Recommended:**

1. Samkhya-karika, (Hindi Tr), Jagannatha Shastri, Motilal Banarasisass, 1998.
2. Samkhya-karika with (Eng), Tr, By Wilson, Delhi, 1978
3. Vedantasara, (Eng. Tr), Swami Nikhilananda, Advaita Ashram, R.K. Mission, Calcutta, 1974
4. Vedantasara (Hindi), Mahesh Candra Bharatiya, Ghaziabad, 1978
5. Sarvadarsana-samgraha, (Eng. Tr.) By. E.B. Cowell, Delhi, 1981
6. Sarvadarsana-samgraha, (Hindi Tr.) By Umashamkar Sharma, Chaukhamba, 1969
7. Vedantasara with Sans. Com. Gudharthadipika and (Eng trans.), Haramohan Mishra, Vidyapuri, Cuttack

# UNIT–I

# इकाई–प्रथम

## सांख्यतत्त्वकौमुदीसहिता

# सांख्यकारिका–१

**( १ )**

**दु:खत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।**
**दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात्॥ १॥**

**अन्वय**–दु:खत्रयाभिघातात् तदपघातके हेतौ जिज्ञासा (जायते), दृष्टे (हेतौ सति) सा अपार्था चेत्, न, (तेन दु:खनिवृत्ते:) एकान्तात्यन्तत: अभावात्।

## टिप्पणी

**दु:खत्रयम्**–१. आध्यात्मिकम्, २. आधिभौतिकम्, ३. आधिदैविकञ्चेति गौडपादाचार्य:।

## सांख्यतत्त्वकौमुदी–

**अजामेकां लोहितशुक्लकृष्णां बह्वी: प्रजा: सृजमानां नमाम:।**
**अजा ये तां जुषमाणां भजन्ते जहत्येनां भुक्तभोगां नुमस्तान्॥ १॥**

**कपिलाय महामुनये मुनये शिष्याय तस्य चासुरये।**
**पञ्चशिखाय तथेश्वरकृष्णायैते नमस्याम:॥ २॥**

इह खलु प्रतिपित्सितमर्थं प्रतिपादयिताऽवधेयवचनो भवति प्रेक्षावताम्। अप्रतिपित्सितमर्थं प्रतिपादयन् 'नायं' लौकिको नापि परीक्षक:' इति प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत। स चैषां प्रतिपित्सितोऽर्थो यो ज्ञात: सन् परमपुरुषार्थाय कल्पते इति प्रारिप्सितशास्त्रविषयज्ञानस्य परमपुरुषार्थसाधनहेतुत्वात् तद्विषयजिज्ञासामवतारयति।

NOTES

एवं हि शास्त्रविषयो न जिज्ञास्येत यदि दुःखं नाम जगति न स्यात्, सद् वा न जिहासितम्, जिहासितं वा अशक्यसमुच्छेदम्। अशक्यसमुच्छेदता च द्वेधा–दुःखस्य नित्यत्वात्, तदुच्छेदोपायापरिज्ञानाद् वा। शक्यसमुच्छेदत्वेऽपि च शास्त्रविषयस्य ज्ञानस्यानुपायत्वाद्वा, सुकरस्योपायान्तरस्य सद्भावाद्वा।

तत्र न तावद् दुःखं नास्ति, नाप्यजिहासितमित्युक्तम्–'दुःखत्रयाभिघातात्' इति।

दुःखानां त्रयं दुःखत्रयम् तत् खलु आध्यात्मिकम् आधिभौतिकम्, आधिदैविकञ्च। तत्राध्यात्मिकं द्विविधम्–शरीरं मानसं च। शरीरं बातपित्तश्लेष्मणां वैषम्यनिमित्तम्। मानसं कामक्रोध लोभमोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनम्। सर्वञ्चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यं दुःखं द्वेधा–आधिभौतिकम्, आधिदैविकञ्च। तत्राधिभौतिकं मानुषपशुमृगपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं तु यक्षराक्षसविनायकग्रहाद्यावेशनिबन्धनम्। तदेतत् प्रत्यात्मवेदनीयं दुःखं रजः परिणामभेदो न शक्यते प्रत्याख्यातुम्। तदनने दुःखत्रयेणान्तः करणवर्तिना चेताशक्तेः प्रतिकूलवेदनीयतयाभिसम्बन्धोऽभिघात इति। एतावता प्रतिकूलवेदनीयत्वं जिहासाहेतुरुक्तः।

यद्यपि न सन्निरुध्यते दुःखम् तथापि तदभिभवः शक्यः कर्तुमित्युपरिष्टादुपपादयिष्यते। तस्मादुपन्नं 'तदपघातके हैतो' इति। तस्य दुःखत्रयस्य अपघातकः तदपाघातकः। उपसर्जनस्यापि बुद्ध्या सन्निकृष्टस्य 'तदा' परामर्शः। अपघातकश्च हेतुः शास्त्रप्रतिपाद्यो नान्य इत्याशयः।

अत्र शङ्कते–''दृष्टे साऽपार्था चेत्'' इति। अयमर्थः–अस्तु तर्हि दुःखत्रयम्, जिहासितं च तद् भवतु च तच्छक्यहानम्, सहतां च शास्त्रयगम्य उपायस्तदुच्छेतुम्, तथाप्यत्र प्रेक्षावतां जिज्ञासा न युक्ता, दृष्टस्यैवोपायस्य तदुच्छेदकस्य सुकरस्य विद्यमानत्वात्; तत्त्वज्ञानस्य तु अनेकजन्माभ्यासपरम्परायाससाध्यतयाऽतिदृष्करत्वात्। तथा च लौकिकानामाभाणकः–

**अर्के चेन्मधु विन्देत किमर्थं पर्वते व्रजेत्।**
**इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत्॥ इति॥**

सन्ति चोपायाः शतशः शरीरदुःखप्रतीकारायेषत्करा भिषजां वरैरुपदिष्टाः। मानसस्यापि सन्तापस्य प्रतीकाराय मनोज्ञस्त्री–पान–भोजन–विलेपनवस्त्रालङ्कारादिविषयसम्प्राप्तिरुपायः सुकरः। एवमाधिभौतिकस्यापि दुःखस्य नीतिशास्त्राभ्यासकुशलतानिरत्ययस्थानाध्यासनादिः प्रतीकारहेतुरीषत्करः। तथाधिदैविकस्यापि दुःखस्य मणिमन्त्रौषधाद्युपयोगः सुकरः प्रतीकारोपाय इति।

निराकरोति–''न'' इति। कुतः? 'एकान्तात्यन्ततोऽभावात्'। एकान्तो–दुःखनिवृत्तेरवश्यम्भावः, अत्यन्तो–विवृत्तस्य दुःखस्य पुनरनुत्पादः, तयो एकान्तात्यन्तयोरभावः। षष्ठीस्थाने सार्वविभक्तिकस्तसिः।

एतदुक्तं भवति–यथाविधि रसायनादिकामिनीनीतिशास्त्राभ्यासमन्त्राद्युपयोगेऽपि तस्य तस्याध्यात्मिकादेर्दुःखस्य निवृत्तरदर्शनात् अनैकान्तिकत्वम्, निवृत्तस्यापि पुनरुत्पत्तिदर्शनात् अनात्यन्तिकत्वम् इति सुकरोऽपि ऐकान्तिकात्यन्तिकदुःखनिवृत्तेर्न दृष्ट उपाय इति नापार्था जिज्ञासेत्यर्थः।

यद्यपि दुःखममङ्गलम् तथापि तत्परिहारार्थत्वेन तदपघातो मङ्गलमेवेति युक्तं शास्त्रादौ तत्कीर्तनमिति।। १।।

## ( २ )

**दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः।**
**तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्।। २।।**

**अन्वय–**आनुश्रविकः दृष्टवत् (अस्ति), हि स अविशुद्धिक्षयातिशययुक्तः (अस्ति), तद्विपरीतः व्यक्ताव्यक्तज्ञविज्ञानात् (उत्पन्नः) श्रेयान्।

**'षट्शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि।**
**अश्वमेधस्य वचनाद्वनानि पशुभिस्त्रिभिः।।'**

**''बहूनीन्द्रसहस्राणि देवानां च युगे युगे।**
**कालेनसमतीतानि, कालो हि दुरतिक्रमः।।''**

**''एवं तत्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।**
**अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानाम्।।''**

## सांख्यतत्त्वकौमुदी–

स्यादेतत्। मा भूद् दृष्ट उपायः, वैदिकस्तु ज्योतिष्टोमादिः संवत्सरपर्यन्तः कर्मकलापस्तापत्रयमेकान्तमत्यन्तञ्चापनेष्यति। श्रुतिश्च, ''स्वर्गकामो यजेत'' इति स्वर्गश्च–

**यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।**
**अभिलाषोपनीतं च तत्सुखं स्वः पदास्पदम्।।**

दुःखविरोधी सुखविशेषश्च स्वर्गः। स च स्वसत्तया समूलघातमपहन्ति दुःखम्। न चैष क्षयी। तथा हि श्रूयते–अपाम सोमममृता अभूम इति। तत्क्षये

NOTES

कृतोऽस्यामृतत्वसम्भवः? तस्माद्वैदिकस्योपायस्य तातत्रयप्रतीकारहेतोर्मुहूर्तया-माहोरात्रमाससंवत्सरनिर्वर्तनपीयस्यानेकजन्मपरम्पराऽऽयाससम्पादनीयात् विवेक-ज्ञानादीषत्करत्वात् पुनरपि व्यर्था जिज्ञासा इत्याशङ्क्याह–

**''दृष्ट'' इति। गुरुपाठादनुश्रूयते इत्यनुश्रवो वेदः।**

एतदुक्तं भवित–श्रूयत एव परं न केनापि क्रियत इति। तत्र भव आनुश्रविकः तत्र प्राप्तो ज्ञात इति यावत्। आनुश्रविकोऽपि कर्मकलापो दृष्टेन तुल्यो वर्तते, ऐकान्तिकात्यन्तिकदुःखत्रयप्रतीकारानुपायत्वस्योभयत्रापि तुल्यत्वात्।

यद्यपि च ''आनुश्रविकः'' इति सामान्याभिधानम्, तथापि कर्मकलापाभिप्रायं द्रष्टव्यम् विवेकज्ञानस्याप्यानुश्रविकत्वात्। तथा च श्रूयते ''आत्मावाऽरे ज्ञातव्यः'' प्रकृतितोः विवेक्तव्यः, ''न स पुनरावर्तते'' इति।।

अस्यां प्रतिज्ञायां हेतुमाह–''स ह्यविशुद्धिक्षयातिशययुक्तः'' इति। ''अविशुद्धिः'' सोमादियागस्य पशुबीजादिवधसानता। यथाऽऽह स्म भगवान् पञ्चशिखाचार्यः–'स्वल्पः सङ्करः सपरिहारः सप्रत्यवमर्षः' इति। 'स्वल्पः सङ्करो' ज्योतिष्टोमादिजन्मन प्रधानापूर्वस्य पशुहिंसादिजन्मताऽनर्थहेतुनापूर्वेण सङ्करः। सपरिहारः' कियतापि प्रायश्चित्तेन परिहर्तुशक्यः। अथ च प्रमादतः प्रायश्चित्तमपि नाचरितम् प्रधानकर्मविपाकसमये स पच्यते। तथापि यावदसोवनर्थं सूते तावत् प्रत्यवमर्षेण सहिष्णुतया स वर्तते इति सप्रत्यवमर्षः। मृष्यन्ते हि पुण्यसम्भारोपनीतस्वर्गसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकाम।

न च–''न हिस्यात् सर्वा भूतानि' इति सामान्यशास्त्र विशेषशास्त्रेण ''अग्निषोमीयं पशुमालभेत'' इत्यनेन बाध्यते इति युक्तम्, विरोधाभावत्। विरोधे हि बलीयसा दुर्बलं बाध्यते। न चेहास्ति कश्चिद् विरोधः भिन्नविषयत्वात्। तथा हि–न हिंस्यात्'' इति निषेधेन हिंसाया अनथंहेतुभावो ज्ञाप्यते, न त्वक्रत्वर्थमपि, ''अग्निषोमीयं पशुमालभेत'' इत्यनेन तु पशुहिसायाः क्रत्वर्थत्वमुच्यते, नानर्थहेतुत्वाभावः, तथा सति वाक्यभेदप्रसङ्गात्। न चानर्थहेतुत्वक्रत्पकारकत्वयोः कश्चिद् विरोधोऽस्ति। हिंसा हि पुरुषस्य दोषमावक्ष्यति क्रतोश्चोपकरिष्यति।

क्षयातिशयौ च फलगतावप्युपाय उपचरितौ। क्षयित्वं च स्वर्गादेः 'सत्वे सति कार्यत्वात्' अनुमित्तम्। ज्योतिष्टोमादयः स्वर्गमात्रस्य साधानम् वाजपेयादयस्तु स्वराज्यस्येत्यतिशययुक्तत्वम्। परसम्पदुत्कर्षो हि हीनसम्पदं पुरुषं दुःखाकरोति।

NOTES

''अपाम सोममममृता अभूम'' इति चामृतत्वाभिधानं चिरस्थेमानमुपलक्षयति।

**यदाहुः–**

''आभूतसंप्लवं स्थानममृतत्त्वं हि भाष्यते'' इति। अतएव च श्रुतिः–

**''न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः।**
**परेण नाक निहितं गुहायां विभ्राजते यद्यतयो विशन्ति।।'' इति**

**तथा ''कर्मणा मृत्युमृषयोनिषेदुः प्रजावन्तो द्रविणमीहमानः।**
**तथा परे ऋषयो ये मनीषिणः परं कर्मभ्योऽमृतत्वमानशुः। इति च।**

तदेतत् सर्वमभिप्रेत्याह–''तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्'' इति। तस्मात् आनुश्रविकात् दुःखापघातकोपायात् सोमपानादेरविशुद्धात् अनित्यसातिशयफलात् विपरीतः विशुद्धः हिंसादिसंकराभावात् नित्यनिरतिशयफलः असकृत् अपुनरावृत्तिश्रुतेः। न च कार्यत्वेनानित्यता फलस्य युक्ता, भावकार्यस्य तथात्वात्, दुःखप्रध्वंसस्य तु कार्यस्यापि तद्वैपरीत्यात्।

न च दुःखान्तरोत्पादः, कारणाप्रवृत्तौ कार्यस्यानुत्पादात्, विवेकज्ञानोपजनन-पर्यन्तत्वाच्च कारणप्रवृत्तेः। एतच्चोपरिष्टादुपपादयिष्यते।

अक्षरार्थस्तु–तस्मात् आनुश्रविकात् दुःखापघातकात् हेतोः, विपरीतः सत्त्वपुरुषान्यताप्रत्ययः दुःखापघातकोः हेतुः, अतएव श्रेयान्। आनुश्रविको हि वेदविहितत्वात् मात्रया दुःखापघातकत्वाच्च प्रशस्यः। सत्त्वपुरुषान्यताप्रत्ययोऽपि प्रशस्यः। तदनयोः प्रशयस्ययोर्मध्ये सत्त्वपुरुषान्यताप्रत्ययः श्रेयान्।

कुतः पुनरस्योत्पत्तिः? इत्यत् आह–''व्यक्ताव्यक्तज्ञविज्ञानात्'' इति। व्यक्तं च अव्यक्तं ज्ञश्च व्यक्ताव्यक्तज्ञाः, तेषां विज्ञानं विवेकेन ज्ञानम्, व्यक्ताव्यक्तज्ञविज्ञानम्। व्यक्तज्ञानपूर्वकमव्यक्तस्य तत्कारणस्य ज्ञानम्। तयोश्च पारार्थ्येनात्मा परो ज्ञायते, इति ज्ञानक्रमेणाभिधानम्।

एतदुक्तं भवति–श्रुतिस्मृतीतिहासपुराणेभ्यो व्यक्तादीन् विवेकेन श्रुत्वा शास्त्रयुक्त्या च व्यवस्थाप्य दीर्घकालादरनैरन्तर्यसत्कारासेवितात् भावनामयात् विज्ञानात् तथा च वक्ष्यति–

**एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।**
**अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्।। (का. ६४) इति**

NOTES

## ( ३ )

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥ ३॥**

**अन्वय**–मूलप्रकृतिः अविकृतिः, महदाद्याः सप्त प्रकृतिविकृतयः, षोडशकः तु विकारः, पुरुषः न प्रकृतिः न विकृतिः।

## सांख्यतत्त्वकौमुदी–

तदेवं प्रेक्षावदपेक्षितार्थत्वेन शास्त्रारम्भं समाधाय शास्त्रमारभमाणः श्रोतृबुद्धिसमवधानाय तदर्थं संक्षेपतः प्रतिजानीते–

संक्षेपतो हि शास्त्रार्थस्य चतस्रो विधाः। कश्चिदर्थः प्रकृतिरेव, कश्चिदर्थो विकृतिरेव, कश्चित्प्रकृतिविकृतिः, कश्चिदनुभयरूपः।

तत्र का प्रकृतिः? इत्यत उक्तम्–''मूलप्रकृतिरविकृतिः'' इति। प्रकरोतीति प्रकृतिः प्रधानं सत्त्वरजस्तमसां साम्यावस्था, अविकृतिः, प्रकृतिरेवेत्यर्थः। कुतः ''इत्युक्तम्–मूलेति''। मूलञ्चासौ प्रकृतिश्चेति मूलप्रकृतिः। विश्वस्य कार्यसङ्घतस्य सा मूलम्, न त्वस्या मूलान्तरमस्ति अनवस्थाप्रसङ्गात्। न चानवस्थायां प्रमाणमस्तीति भावः।

कतमाः पुनः प्रकृतिविकृतयः, कियत्यश्च? इत्यत उक्तम्–''महदाद्याः प्रकृतिविकृतयः सप्त'' इति। प्रकृतयश्च विकृतयश्च ता इति प्रकृतिविकृतयः सप्त। तथा हि–महत्तत्त्वमहङ्कारस्य प्रकृतिः, विकृतिश्च मूलप्रकृतेः। एवम् अहङ्कारतत्त्वं तन्मात्राणामिन्द्रियाणां च प्रकृतिः, विकृतिश्च महतः। एवं पञ्चतन्मात्राणि तत्त्वानि भूतानामाकाशादीनां प्रकृतयो विकृतयश्चाहङ्कारस्य।

अथ का विकृतिरेव कियती च? इत्यतः उक्तम्–''षोडशकस्तु विकारः, इति। षोडशसंख्यापरिमितो गणः षोडशकः। तुशब्दोऽधारणे भिन्नक्रमश्च। पञ्च महाभूतानि एकादश इन्द्रियाणि चेति षोडशको गणो विकार एव, न प्रकृतिरिति। यद्यपि च पृथिव्यादीनां गोघटवृक्षादयो विकाराः एवं तद्विकारभेदानां पयोबीजादीनां दध्यङ्कुरादयः, तथापि गवादयो बीजादयो वा न पृथिव्यादिभ्यस्तत्त्वान्तरम्। तत्त्वान्तरोपादानत्वं च प्रकृतित्वम् इहाभिप्रेतमिति न दोषः। सर्वेषां गोघटादीनां स्थूलतेन्द्रियग्राह्यता च समेति न तत्त्वान्तरत्वम्।''

अनुभयरूपमुक्तं, तदाह–''न प्रकृतिर्न विकृतिः पुरुषः'' इति। एतच्च सर्वमुपरिष्टादुपपादयिष्यते।

NOTES

## ( ४ )

**दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।**
**त्रिविधं प्रमाणमिष्टं, प्रमेयसिद्धिः प्रमाणाद्धि॥ ४॥**

**अन्वय**–सर्वप्रमाणसिद्धत्वात् दृष्टम् अनुमानम् आप्तवचनम् च त्रिविधम् प्रमाणम् इष्टम्। प्रमाणात् हि प्रमेयसिद्धिः।

## सांख्यतत्त्वकौमुदी–

तमिममर्थ प्रामाणिक कर्तुमभिमताः प्रमाणभेदा लक्षणीयाः, न च सामान्यलक्षणमन्तरेण शक्यते विशेषलक्षणं कर्तुमिति प्रमाणसामान्यं तावल्लक्षयति–

अत्र च 'प्रमाणम्' इति समाख्या लक्ष्यपदं तन्निर्वर्चनं च लक्षणम्। प्रमीयतेऽनेनेति निर्वचनात् प्रमा इति करणत्वं गम्यते। तच्च असन्दिग्धाविपरीतानधिगतविषया चित्तवृत्तिः। बोधष्च पौरुषेयः फलं प्रमा, तत्साधनं प्रमाणमिति। एतेन संशयविपर्ययस्मृतिसाधनेष्वप्रसङ्गः।

सङ्ख्याविप्रतिपत्तिं निराकरोति–''त्रिविधम्'' इति। तिस्रो विधा अस्य प्रमाणसामान्यस्त तत् त्रिविधम्, न न्यूनं नाप्यधिकमित्यर्थः। विशेषलक्षणानन्तरञ्चैततदुपपादयिष्यामः।

कतमाः पुनस्ता विधाः? इत्यत आह–''दृष्टमनुमानमाप्तवचनं च'' इति। एतच्च लौकिकप्रमाणाभिप्रायेण लोकव्युत्पादनार्थत्वाच्छास्त्रस्य तस्यैवा त्राधिकारात्। आर्षं तु विज्ञानं योगिनामूर्ध्वस्रोतसां न लोकव्युत्पादनायालमिति सदपि नाभिहितम्, अनधिकारात्।

स्यादेतत्-मा भून्यूनम्, अधिकं तु कस्मान्न भवति? सङ्गिरन्ते हि प्रतिवादिनः उपमानादीन्यपि प्रमाणानि, इत्यत आह–''सर्वप्रमाणसिद्धत्वात्'' इति एष्वेव दृष्टानुमानाप्तवचनेषु सर्वेषां प्रमाणानां सिद्धत्वात् अन्तर्भावादित्यर्थः। एतच्चोपादयिष्यत इत्युक्तम्।

अथ प्रमेयव्युत्पादनाय प्रवृत्तं शास्त्रं कस्मात् प्रमाण सामान्यतो विशेषतश्च लक्षयति? इत्यत आह–'प्रमेयसिद्धिः' प्रमाणाद्धि इति। सिद्धिः प्रतीतिः। सेयमार्याऽर्थक्रमानुरोधेन पाठक्रममनादृत्यैव व्याख्याता॥ ४॥

**( ५ )**

**प्रतिविषयाध्यवसायो दृष्टं, त्रिविधमनुमानमाख्यातम्।**
**तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु॥ ५॥**

**अन्वय**–प्रतिविषयाध्यवसायः दृष्टम् अनुमानम् त्रिविधम् आख्यातम् तत् लिङ्ग–लिङ्गिपूर्वकम् (भवति), आप्तश्रुतिः तु आप्तवचनम्।

**गृहीतानिन्द्रियैरर्थानात्मनेः यः प्रयच्छति।**
**अन्तः करणरूपाय तस्मै विश्वात्मने नमः॥ ( वि०पु० )**

## सांख्यतत्त्वकौमुदी–

सम्प्रति प्रमाणविशेषलक्षणावसरे प्रत्यक्षस्य सर्वप्रमाणेषु ज्येष्ठत्वात् तदधीनत्वाच्चानुमानादिनां सर्ववादीनामविप्रतिपत्तेश्च तदेव तावल्लक्षयति– ''प्रतिविषयाध्यवसायो दृष्टम्'' इति। अत्र ''दृष्टम्'' इति लक्ष्यनिर्देशः, परिशिष्टं तु लक्षणम्। समानासमानजातीयव्यवच्छेदो लक्षणार्थः।

अवयवार्थस्तु–विषिण्वन्ति विषयिणमनुबध्नन्ति, स्वेन रूपेण निरूपणीयं कुर्वन्तीति यावत्। ''विषयाः'' पृथिव्यादयः सुखादयश्च। अस्मदादीनामविषयाः तन्मात्रलक्षणाः योगिनामूर्ध्वस्त्रोतसाञ्च विषयाः। विषयं विषयं प्रति वर्तते इति प्रतिविषयम्। वृत्तिश्च सन्निकर्षः, अर्थसन्निकृष्टमिन्द्रियमित्यर्थः। तस्मिन् अध्यवसायः तदाश्रित इत्यर्थः। अध्यवसायश्च बुद्धिव्यापारो ज्ञानम्। उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽध्यवसाय इति, वृत्तिरिति, ज्ञानमिति चाख्यायते। इदं तत्प्रमाणम्। अनेन यश्चेतनाशक्तेरनुग्रहस्तफलं प्रमा बोधः।

बुद्धितत्त्वं हि प्राकृतत्वादचेतनमिति तदीयोऽध्यवसायोऽप्यचेतनः घटादिवत्। एव बुद्धितत्त्वस्य सुखादयोऽपि परिणामभेदा अचेतनाः। पुरुषस्तु सुखाद्यननुषंगी चेतनः। सोऽयं बुद्धितत्त्ववर्त्तिना ज्ञानसुखादिना यत्प्रतिबिम्बितस्तच्छायापत्त्या ज्ञानसुखादिमानिव भवतीति चेतनोऽनुगृह्यते। चितिच्छायापत्त्याऽचेतनाऽपि बुद्धिस्तदध्यवसायोऽप्यचेतश्चेतनवद् भवतीति, तथा च वक्ष्यति।

अत्राऽध्यवसायग्रहणेन संशयं व्यवच्छिनति, संशयस्याऽनवस्थितग्रहणत्वेना–निश्चितरूपत्वात्। निश्चयोऽध्यवसाय इति चानर्थान्तरम्। विषयग्रहणेन चासद्विषयं विपर्ययमपाकरोति। प्रतिग्रहणेन चेन्द्रियार्थसन्निकर्षसूचनादनुमानस्मृत्यादयश्च पराकृता भवन्ति। तदेवं समानासमानजातीयव्यवच्छेदकत्वात् ''प्रतिविषयाध्यवसायः''

NOTES

इति दृष्टस्य सम्पूर्ण लक्षणम्। तन्त्रान्तरेषु लक्षणान्तराणि तैथिकानां न दूषितानि, विस्तरभयादिति।

'नानुमान प्रमाणम्' इति वदता लौकायतिकेनाऽप्रतिपन्नः संदिग्धो विपर्य स्तो वा पुरुषः कथ प्रतिपद्येत? न च पुरुषान्तर्गता अज्ञानसन्देहविपर्ययाः शक्या अर्वाग्दृशा प्रत्यक्षेण प्रतिपत्तुम्। नाऽपि प्रमाणान्तरेण, अनभ्युपगमात्। अनवधृताज्ञानसंशयविपर्ययस्तु यं कञ्चन पुरुषं प्रति प्रवर्तमानोऽनवधेयवचनतया प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्यते। तदनेनाज्ञानादयः परपुरुषवर्तिनोऽभिप्रायभेदाद्वचन-भेदाद्वालिङ्गादनुमातव्याः, इत्यकामेनाऽप्यनुमानं प्रमाणमभ्युपेयम्।

तत्रप्रत्यक्षकार्यत्वादनुमानं प्रत्यक्षानन्तरं लक्षणीयम्। तत्राऽपि सामान्य लक्षणपूर्वकत्वाद्विशेषलक्षणस्यानुमानसामान्यं तावल्लक्षयति "तल्लिङ्गलिङ्गि-पूर्वकम्" इति। लिङ्गम् व्याप्यम्। लिङ्गी व्यापकम्। शङ्कितसमारोपितोपाधिनिरा-करणेन च वस्तुस्वभावप्रतिबद्धं व्याप्यम्, येन प्रतिबद्धं तद् व्यापकम्।

लिङ्गलिङ्गिग्रहणेन विषयवाचिना विषयिण प्रत्ययमुपलक्षयति। 'धूमादिर्व्याप्यो वह्नयादिर्व्यापक्' इति यः प्रत्ययस्तत्पूर्वकम्। लिङ्गिग्रहणं चावर्तनीयम् तेन च लिङ्गमस्याऽस्तीति पक्षधर्मताज्ञानमपि दर्शितं भवति। तत् 'व्याप्यव्यापक-भावपक्षधर्मताज्ञानपूर्वकमनुमानम् इत्यनुमानसामान्यं लक्षितम्।'

अनुमानविशेषान् तन्त्रान्तरलक्षितान् अभिमतान् स्मारयति–'त्रिविध-मनुमानमाख्यातम्' इति। तत् सामान्यतो लक्षितनुमानं विशेषतस्त्रिविधं, पूर्ववत्। शेषवत् सामान्यतोदृष्टञ्चति। तत्र प्रथमं तावत् द्विविधम्–वीतमवींत च। अन्वयमुखेन प्रवर्तमानं विधायकं वीतम्। व्यतिरेकमुखेन प्रवर्तमानं निषेधकमवीतम्। तत्रावीतं शेषवत् शिष्यते परिशिष्यते इति शेषः। स एव विषयतया यस्याऽस्त्यनुमानज्ञानस्य तच्छेषवत्, यदाहुः–'प्रसक्तप्रतिषेधे अन्यत्राप्रसङ्गात् शिष्यमाणे सम्प्रत्ययः परिशेषः' (न्यायभाष्यम्) इति। अस्य चावीतस्य व्यतिरेकिण उदाहरणमग्रेऽभिधास्यते।

वीतं द्वेधा-पूर्ववत् सामान्यतोदृष्टं च। तत्रैकं दृष्टस्वलक्षणसामान्यविषयं यत्, तत्पूर्ववत्। पूर्वं प्रसिद्धं दृष्टस्वलक्षणसामान्यमिति यावत्, तदस्य विषयत्वेनास्त्यनुमानज्ञानस्येति पूर्ववत्। यथा धूमाद्वह्नित्वसामान्यविशेषः पर्वतेऽनुमीयते, तस्य वह्नित्वसामान्यविशेषस्य स्वलक्षणं वह्निविशेषो दृष्टो रसवत्याम्।

अपरं च वीतं सामान्यतोदृष्टं अदृष्टस्वलक्षणसामान्यविषयम्। यथेन्द्रिय-विषयानुमानम्। अत्र हि रूपादिविज्ञानानां क्रियात्वेन करणवत्त्वमनुमीयते।

यद्यपि करणत्वसामान्यस्य छिदादौ वास्यादिस्वलक्षणमुपलब्धं, तथाऽपि यज्जातीयं रूपादिज्ञाने करणवत्त्वमनुमीयते, तज्जातीयस्य करणस्य न दृष्टं स्लक्षणं प्रत्यक्षेण। इन्द्रियजातीयं हि तत्करणम्। न चेन्द्रियत्वसामान्यस्य स्वलक्षण-मिन्द्रियविशेषः प्रत्यक्षगोचरोऽर्वाग्दृशाम्, यथा वह्नित्वसामान्यस्य स्वलक्षणं वह्निः। सोऽयं पूर्ववतः सामान्यतोदृष्टात् सत्यपि वीतत्त्वेन तुल्यते विशेषः, अत्र च दृष्ट दर्शनम्। सामान्यत इति सामान्यस्य, सार्वविभक्तिकस्तसिः। अदृष्टस्वलक्षणस्य सामान्यविशेषस्य दर्शनं सामान्यतोदृष्टमनुमानमित्यर्थः। सर्वं चैतदस्माभिर्न्यायवार्तिकतात्पर्यटीकायां व्युत्पादितमिति नेहोक्तं विस्तरभयात्।

प्रयोजकवृद्धशब्दश्रवणसमनन्तरं प्रयोज्यवृद्धप्रवृत्ति हेतुज्ञानानुमानपूर्वक-त्वाच्छब्दार्थसम्बन्धग्रहणस्य, स्वार्थसम्बन्धज्ञानसहकारिणश्च शब्दस्यार्थप्रत्याय-कत्वादनुमानपूर्वकत्वमित्यनुमानानन्तरं शब्दं लक्ष्यति–'आप्तश्रुतिराप्तवचनं तु' इति। अत्र आप्तवचनमिति लक्ष्यनिर्देशः, परिशिष्टं लक्षणम्। आप्ता प्राप्ता युक्तेति यावत्। आप्ता चासौ श्रुतिश्चेति आप्तश्रुतिः। श्रुतिः–वाक्यजनितं वाक्यार्थज्ञानम्।

तच्च स्वतः प्रमाणम् अपौरुषेयवेदवाक्यजनितत्वेन सकलदोषाशङ्का-विनिर्मुक्तेर्युक्ता भवति। एवं वेदमूलस्मृतीतिहासपुराणवाक्यजनितमपि ज्ञानं युक्तं भवति।

आदिविदुषश्च कपिलस्य कल्पादौ कल्पान्तराधीतश्रुतिस्मरणसम्भवः, सुप्तप्रबुद्धस्येव पूर्वेद्युरवगतानामर्थानामपरेद्युः। तथा च आवट्यजैगीषव्यसंवादे भगवान जैगीषव्यो दशमहाकल्पवर्तिजन्मस्मरणमात्मन उवाच 'दशसु महाकल्पेषु विपरिवर्तमानेन मया' इत्यादिना ग्रन्थसन्दर्भेण।

आप्तग्रहणेनायुक्ताः शाक्यभिक्षुनिर्ग्रन्थसंसारमोचकादीनामागमाभासाः परिहृता भवन्ति। अयुक्तत्वं चैतेषां विगानान, विच्छिन्नमूलत्वात्, प्रमाणविरुद्धार्थाभिधानाच्च, कैश्चिदेव म्लेच्छादिभिः पुरुषापसदैः पशुप्रायैः परिग्रहाद्वा बोद्धव्यम्।

'तु' शब्देनानुमानाद् व्यवच्छिन्नत्ति। वाक्यार्थो हि प्रमेयः, न तु तद्धर्मो वाक्यम्, येन तत्र लिङ्गं भवेत्। न च वाक्यं वाक्यार्थं बोधयत् सम्बन्धग्रहणमपेक्षते, अभिनवकविरचितस्य वाक्यस्यादृष्टपूर्वस्याननुभूतचरवाक्यार्थबोधकत्वात्।

एवं प्रमाणसामान्यलक्षणेषु तद्विशेषलक्षणेषु च सत्सु यानि प्रमाणान्त-राण्युपमानादीनि प्रतिवादिभिरभ्युपेयन्ते तान्युक्तलक्षणेष्वेव प्रमाणेष्वन्तर्भवन्ति। तथा हि–उपमानं तावत् 'यथा गौस्तथा गवयः' इति वाक्यम्, तज्जनिता धीरागम एव। योऽप्ययं 'गवयशब्दो गोसदृशस्य वाचक' इति प्रत्ययः'

NOTES

सोऽप्यनुमानमेव। यो हि शब्दो यत्र वृद्धैः प्रयुज्यते, सोऽसति वृत्त्यन्तरे तस्य वाचकः, यथा गोशब्दो गोत्वस्य। प्रयुज्यते चैवं गवयशब्दो गोसदृशे इति तस्यैव वाचक इति तत् ज्ञानमनुमानमेव। यत्तु गवयस्य चक्षुःसन्निकृष्टस्य गोसादृश्यज्ञानं तत् प्रत्यक्षमेव। अत एव स्मर्यमाणायां गविगवयसादृश्यज्ञानं प्रत्यक्षम्। न त्वन्यद् गवि सादृश्यम् अन्यच्च गवये। भूयोऽवयवसामान्योगो हि जात्यन्तरवर्ती जात्यन्तरे सादृश्यमुच्यते, सामान्ययोगश्चैकः। स चेद् गवये प्रत्यक्षः, गव्यपि तथेति नोपमानस्य प्रमेयान्तरमस्ति यत्र प्रमाणान्तरमुपमानं भवेत्, इति न प्रमाणान्तरमुपमानम्।

एवमर्थापत्तिरपि न प्रमाणान्तरम्। तथा हि जीवतश्चैत्रस्य गृहाभावदर्शनेन बहिर्भावस्याऽदृष्टस्य कल्पनमर्थापत्तिरभिमता वृद्धानाम्। साप्यनुमानमेव। यदा खल्वव्यापकः सन्नेकत्र नास्ति तदाऽन्यत्रास्ति यदाऽव्यापक एकत्रास्ति तदाऽन्यत्र नास्ति, इति सुकरः स्वशरीरे व्याप्तिग्रहः। तथा च सतो गृहाभावदर्शनेन लिङ्गेन बहिर्भावदर्शनमनुमानमेव। न च चत्रस्य क्वचित्सत्त्वेन गृहाभावः शक्योऽपह्नोतुम्, येनाऽसिद्धो गृहाभावो बहिर्भावे न हेतुः स्यात्। न च गृहाभावेन वा सत्त्वमपह्नू यते येन सत्त्वमेवाऽनुपपद्यमानमात्मानं न बहिरवस्थापयेतु। तथा हि–चैत्रस्य गृहासत्त्वेन, सत्त्वमात्रं विरुध्यते गृहसत्त्वं वा। न तावद्यात्र क्वचन सत्त्वस्यास्ति विरोधो गृहासत्त्वेन, भिन्नविषयत्वात्। देशसामान्येन गृहविशेषाक्षेपोऽपि पाक्षिक इति समानविषयतया विरोध इति चेत, न, प्रमाणविनिश्चितस्य ग्रहेऽसत्त्वस्य पाक्षिकतया सांशयिकेन गृहसत्त्वेन प्रतिक्षेपायोगात्। नाऽपि प्रमाणविनिश्चितो गृहाभावः पाक्षिकमस्य गृहसत्त्वं प्रतिक्षिपन् सत्त्वमपि प्रतिक्षेप्तुं सांशयिकत्वं च व्यपनेतुमर्हतीति युक्तम्। गृहावच्छिन्नेन चैत्राभावेन गृहसत्त्वं विरुद्धयते, न तु सत्त्वमात्रम्, तस्य तत्रौदासीन्यात्। तस्माद् गृहाभावेन लिङ्गेन सिद्धेन सता बहिर्भावोऽनुमीयत इति युक्तम्। एतेन विरुद्धयोः प्रमाणयोविषयव्यवस्था-याऽविरोधापादनमर्थापत्तेर्विषय इति निरस्तम्, अवच्छिन्नानवच्छिन्नयोर्विरोधाभावात्। उदाहरणान्तराणि चार्थापत्तेरेवमेवानुमानेऽन्तर्भावनीयानि। तस्मान्नानुमानात्प्रमाणा-न्तरमर्थापत्तिरिति सिद्धम्।

एवमभावोऽपि प्रत्यक्षमेव। न हि भूतलस्य परिणामविशेषात् कैवल्यलक्षणादन्यो घटाभावो नाम। प्रतिक्षणपरिणामिनो हि सर्व एव भावाः ऋते चितिशक्तेः। स च परिणामभेद ऐन्द्रियिक इति नास्ति प्रत्यक्षानवरुद्धो विषयो यत्राभावाह्वयं प्रमाणान्तरमभ्युपेयेतेति।

सम्भवस्तु यथा खर्यां द्रोणाढकप्रस्थाद्यवगमः, स चानुमानमेव। खारीत्वं हि द्रोणाद्यविनाभूतं प्रतीतं खार्यां द्रोणादिसत्त्वमवगमयति।

NOTES

यच्चानिर्दिष्टप्रवक्तृकं प्रवादपरम्परामात्रम्–'इति होचुर्वृद्धाः' इत्यैतिह्यम्, यथा 'इह वटे यक्षः प्रतिवसति' इति, न तत् प्रमाणान्तरम्, अनिर्दिष्टप्रवक्तृकत्वेन सांशयिकत्वात्'। आप्तवक्तृकत्वनिश्चये त्वागम एव, इत्युपपन्नं ''त्रिविधं प्रमाणम्'' इति।

( ६ )

**सामान्यतस्तु दृष्टाादतीन्द्रियाणां प्रतीतिरनुमानात्।**
**तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धम्।। ६।।**

**अन्वय**–सामान्यतोदृष्टात् अनुमानात् तु अतीन्द्रियाणाम् प्रतीतिः, तस्मात् अपितु च असिद्धम् परोक्षम् आप्तागमात् सिद्धम्।

## सांख्यतत्त्वकौमुदी–

एवं तावद् व्यक्ताव्यक्तज्ञलक्षणप्रमेयसिद्ध्यर्थ प्रमाणानि लक्षितानि। तत्र व्यक्तं पृथिव्यादि स्वरूपतः पांसुलपादो हालिकोऽपि प्रत्यक्षतः प्रतिपद्यते पूर्ववता चानुमानेन धूमादिदर्शनात् वह्न्यादीनि चेति, तद्व्युत्पादनाय मन्दप्रयोजनं शास्त्रमिति दुरधिगमनेन व्युत्पाद्यम्। तत्र यत्प्रमाणं यत्र शक्तं, तदुक्तलक्षणेभ्यो: प्रमाणेभ्यो निष्कृष्य दर्शयति। 'सामान्यतः' इति। 'तु' शब्दः प्रत्यक्षपूर्ववद्भ्यां विशिनष्टि। सामान्यतोदृष्टादनुमानादतीन्द्रियाणां प्रधानापुरुषादीनां प्रतीतिः चितिच्छायापत्तेर्बुद्धेरध्यवसायादित्यर्थः। उपलक्षणं चैतत्, शेषवत् इत्यपि द्रष्टव्यम्।

तत् किं सर्वेषु अतीन्द्रियेषु सामान्यतोदृष्टमेव प्रवर्तते? तथा च यत्र तन्नास्ति, महदाद्यारम्भक्रमे स्वर्गापूर्वदेवतादौ च, तत्र तेषाभावः प्राप्त इत्यत आह–'तस्मादपि' इति। तस्मादपीत्येतावतैव सिद्ध चकारेण शेषवत् इत्यपि समुच्चितम्।

( ७ )

**अतिदूरात् सामीप्यादिन्द्रिघातान्मनोऽनवस्थानात्।**
**सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च।। ७।।**

**अन्वय**–अतिदूरात् सामीप्यात् इन्द्रियघातात् मनोऽनवस्थानात् सौक्ष्म्यात् व्यवधानात् अभिभवात् समानाभिहारात् च (अर्थानामनुपलब्धिर्भवती)।

## सांख्यतत्त्वकौमुदी–



स्यादेतत् यथा गगनकु सुमकूर्मरोमशशविषाणादिषु प्रत्यक्षमप्रवर्तमानं तदभावमवगमयति, एवं प्रधानादिष्वपि। तत्कथं तेषां सामान्यतोदृष्टादिभ्य: सिद्धि:? इत्यत आह–अतिदूरात्' इति।

अनुपलब्धिरिति वक्ष्यमाणं (का० ८) सिंहावलोकनन्यायेनानुषञ्जनीयम्। यथा उत्पतन् वियति पतत्री अतिदुरताया सन्नपि प्रत्यक्षेण नोपलभ्यते। सासीप्यादित्यत्राप्यतिरनुवर्तनीय:। यथा लोचनस्थमञ्जनमतिसामीप्यान्न दृश्यते। इन्द्रियघातोऽन्धत्वबधिरत्वादि:। मानोऽनवस्थानात्–यथा कामाद्युपहतमना: स्फीतालोकमध्यवर्तिनमिन्द्रियसन्निकृष्टमप्यर्थ न पश्यति। सौक्ष्म्यात्यथेन्द्रियसन्नि-कृष्टं परमाण्वादि प्रणिहितमना अपि न पश्यति। व्यवधानात्–यथा कुड्यादिव्यवहितं राजदारादिकं न पश्यति। अभिभवत्–यथाऽहनि सौरीभिर्भा-भिरभिभूतं ग्रहनक्षत्रमण्डलं न पश्चति। समानाभिहारात्–यथा तोयदविमुक्तानुदबिन्दुन् जलाशये न पश्यति। चकारोऽनुक्तसमुच्चयार्थ:, तेनानुद्भवोऽपि संगृहीत:। तद्यथा क्षीराद्यवस्थायां दध्याद्यनुद्भवान्न पश्यति।

एतदुक्तं भवति। प्रत्यक्षनिवृत्तिमात्राद्वस्त्वभावो न भवति, अतिप्रसङ्गात्। तथा हि–गृहाद्विनिर्गतो गृहजनमपश्यस्तदभावं विनिश्चिनुयात् न त्वेवम्। अपितु योग्यप्रत्यक्षनिवृत्तेरयमभावं विनिश्चिनोति। न च प्रधानपुरुषदीनामस्ति प्रत्यक्षयोग्यता, इति न तन्निवृत्तिमात्रात्तदभावनिश्चयो युक्त: प्रामाणिकानामिति।

### (८)

**सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धे:।**
**महदादि तच्च कार्यप्रकृतिसरूपं विरूपं च॥ ८॥**

**अन्वय–**सौक्ष्म्यात् तदनुपलब्धि: न अभावात्, कार्यात: ततदुलब्धे: तत् कार्यमहदादि च प्रकृतिसरूपं विरूपं च (अस्ति)।

## सांख्यतत्वकौमुदी–

कतमत्पुनरेतेषु कारणं प्रधानादीनामनुपलब्धौ? इत्यत आह–''सौक्ष्म्यादिति'' अथाभावादेव सप्तमरसवदेतेषामनुपलब्धि:। कस्मान्न भवति? इत्यत आह–''नाभावात्'' इति। कुत:। ''कार्यतस्तदुपलब्धे:''। 'तत्' इति प्रधानं परामृशति। पुरुषोपलब्धौ तु प्रमाणं वक्ष्यति, 'सङ्घातपरार्थत्वात् (का १८) इति।

NOTES

दृढतरप्रमाणावधारिते हि प्रत्यक्षमप्रवर्त्तमानमयोग्यत्वान्न प्रवर्तते इति कल्पयते। सप्तमस्तु रसो न प्रमाणेनावधारित इति न तत्र प्रत्यक्षरस्यायोग्यता शक्याऽध्यवसितुमित्यभिप्रायः।

किं पुनस्तत्कार्य यतः प्रधानानुमानम्? इत्यत आह—''महदादि तच्च कार्यम्'' इति। एतच्च यथा गमकं तथोपरिष्टादुपपादयिष्यते। तस्य च कार्यस्य विवेकज्ञानोपयोगिनी सारूप्यवैरूप्ये आह—''प्रकृतिसरूपं विरूपं च'' इति। एते तूपरिष्टाद्विभजनीये इति।

## ( ९ )

**असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।**
**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥ १॥**

**अन्वय**—असद्करणात्, उपादानग्रहणात्, सर्वसम्भवाभावात्, शक्तस्य शक्यकरणात् कारणभावात् च कार्यम् सत् (अस्ति)।

## सांख्यतत्त्वकौमुदी—

कार्यात् कारणमात्रं गम्यते। सन्ति चात्र वादिनां विप्रतिपत्तयः। तथा हि केचिदाहुः—'असतः सत् जायते' इति। एकस्य सतो विवर्तः कार्यजातं, न वस्तुसत्' इत्यपरे। अन्ये तु 'सतः असत् जायते' इति। 'सतः सत् जायते' इति वद्धाः।

तत्र पूर्वस्मिन् कल्पत्रये प्रधानं न सिध्यति। सुखदुःखमोहभेदवत्स्त्र-रूपपरिणामशब्दाद्यात्मकं हि जगत् कारणस्य प्रधानत्वं सत्त्वरजस्तमः स्वभावत्वमवगमयति।

यदि पुनरसतः सज्जायते, असत् निरुपाख्यं कारणं सुखादिरूपशब्दाद्यात्मकं कथं स्यात्? सदसतोस्तादात्म्यानुपपत्तेः।

अथैकस्य सतो विवर्तः शब्दादिप्रपञ्चः, तथापि सतः सज्जायेत इति न स्यात्। न चास्याद्वयस्य प्रपञ्चात्मकत्वम्, अपि त्वप्रपञ्चस्य प्रपञ्चात्मकतया प्रतीतिर्भ्रम एव।

येषामति कणभक्षाक्षचरणादीनां सतः एव कारणादसतो जन्म, तेषामपि सदसतोरेकत्वानुपपत्तेर्न कार्यात्मकं कारणमिति न तन्मते प्रधानसिद्धिः।

NOTES

अतः प्रधानसिद्ध्यर्थं प्रथमं तावत्सत्कार्यं प्रतिजानीते। 'असदकरणात्' इति। ''सत् कार्यम्'' कारणव्यापारात् प्रागपीति शेषः। तथा च न सिद्धसाधनं नैयायिकतनयैरुद्भावनीयम्।

यद्यपि बीजमृत्पिण्डादिप्रध्वंसानन्तरमंकुरघटाद्युत्पत्तिरुपलभ्यते, तथापि न प्रध्वंसस्य कारणत्वम् अपितु भावस्यैव बीजाद्यवयवस्य। अभावात्तु भावोत्पत्तौ तस्य सर्वत्र सुलभत्वात् सर्वदा सर्वकार्योत्पादप्रसङ्ग इत्यादि न्यायवार्तिकतात्पर्यटी-कायामस्माभिः प्रतिपादितम्।

प्रपञ्चप्रत्ययश्चासति बाधके न शक्यो मिथ्येति वदितुम् इति।

कणभक्षाक्षचरणमतमवशिष्यते। तत्रेद प्रतिज्ञातम्, 'सत् कार्यम्' इति। अत्र हेतुमाहः ''असदकरणात्'' इति असत् चेत् कारणव्यापारात् पूर्वं कार्यम् नास्य सत्त्वं कर्तुं केनापि शक्यम्। न हि नीलं शिल्पिसहस्रेणापि पीतं कर्तुं शक्यते। सदसत्त्वे घटस्य धर्मौ इति चेत्, तथापि असति धर्मिणि न तस्य धर्म इति सत्त्वं तदवस्थमेव, तथा च नासत्त्वम्। असम्बद्धेनातदात्मना चासत्त्वेन कथमसन् घटः? तस्मात् कारणव्यापारादूर्ध्वमिव ततः प्रागपि सदेव कार्यमिति।

कारणाच्चास्य सतोऽभिव्यक्तिरेवावशिष्यते। सतश्चाभिव्यक्तिरुपपन्ना। यथा पीडनेन तिलेषु तैलस्य, अवघातेन धान्येषु तण्डुलानाम् दोहनेन सौरभेयीषु पयसः। असतः करणे तु न निदर्शनं किञ्चिदस्ति। न खल्वभिव्यज्यमानं चोत्पद्यमानं वा क्वचिदसद् दृष्टम्।

इतश्च कारणव्यापारात् प्राक् सदेव कार्यम्–''उपादानग्रहणात्''। उपादानानि कारणानि तेषां ग्रहणं कार्येण सम्बन्धः। उपादानैः कार्यस्य सम्बन्धादिति यावत्। एतदुक्त भवति–कार्येण सम्बद्धं कारणं कार्यस्य जनकम्, सम्बन्धश्च कार्यस्यासतो न सम्भवति, तस्मादिति।

स्यादेतत्–असम्बद्धमेव कारणैः कार्यं कस्मात्र जन्यते? तथा चासदेवोत्पत्स्यत इत्यत आह–सर्वसम्भवाभावात्'' इति। असम्बद्धस्य जन्यत्वे असम्बद्धत्वाविशेषेण सर्वं कार्यजातं सर्वस्माद्भवेत। न चैतदस्ति। तस्मान्नासम्बद्धमसम्बद्धेन जन्यते, अपि तु सम्बद्धं सम्बद्धेन जन्यत इति। यथाहुः सांख्यवृद्धाः–

**असत्त्वे नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः।**
**असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः॥ इति॥**

स्यादेतत्–असम्बद्धमपि सत् तदेव करोति यत्र यत्कारणं शक्तं, शक्तिश्च कार्यदर्शनादवगम्यते। तेन नाव्यवस्थेत्यत आह–''शक्तस्य शक्यकारणात्।'' इति

NOTES

सा शक्तिः शक्तकारणाश्रया सर्वत्र वा स्यात्, शक्ये यव वा? सर्वत्र चेत्, तदवस्थैवाव्यवस्था। शक्ये चेत्कथमसति शक्ये तत्र इति वक्तव्यम्। शक्तिभेद एव एतादृशो यत्रः किञ्चिदेव कार्यं जनयेत् न सर्वमिति चेत्, हन्त भोः। शक्तिविशेषः कार्यसम्बद्धो वाऽसम्बद्धो वा? सम्बद्धत्वे नाऽसता सम्बन्ध इति सत् कार्यम्। असम्बद्धत्वे सैवाव्यवस्था, इति सुष्ठूक्तं ''शक्तस्य शक्यकरणात्'' इति। इतश्च सत्कार्यमित्याह–''कारणभावाच्च'', कार्यस्य कारणात्मकत्वात्। न हि कारणाद्भिन्नं कार्यम्, कारणं च सदिति कथं तदभिन्नं कार्यमसद्भवेत्?

कार्यस्य कारणाभेदसाधनानि च प्रमाणानि–

न पटस्तन्तुभ्यो भिद्यते, तन्तुधर्मत्वात्; इह यद्यतो भिद्यते तत् तस्य धर्मो न भवति, यथा गौरश्वस्य। धर्मश्च पटस्तन्तूनां, तस्मान्नार्थान्तरम्।

उपादानोपादेयभावाच्च नार्थान्तरत्वं तन्तुपटयोः, ययोरर्थान्तरत्वं न तयोरुपादानोपादेयभावः, यथा घटपटयोः। उपादानोपादेयभावश्च तन्तुपटयोः, तस्मान्नार्थान्तरत्वम्।

इतश्च नार्थान्तरत्वं तन्तुपटयोः–संयोगाप्राप्त्यभावात्। अर्थान्तरत्वे हि संयोगों दृष्टो यथा कुण्डबदरयोः, अप्राप्तिर्वा यथा हिमवद्विन्ध्ययोः। न चेह संयोगाप्राप्ती, तस्मान्नार्थान्तरत्वम्।

इतश्च पटस्तन्तुभ्यो न भिद्यते, गुरुत्वान्तरकार्याग्रहणात्। इह यद्यस्माद्भिन्नं तस्मात् तस्य गुरुत्वान्तरं कार्यं गृह्यते, यथैकपलिकस्य स्वस्तिकस्य यो गुरुत्वकार्योऽवनतिविशेषस्तस्माद् द्विपलिकस्य स्वस्तिकस्य गुरुत्वकार्योऽवनति-भेदोऽधिकः। न च तथा तन्तुगुरुत्वकार्यात् पटगुरुत्वकार्यान्तरं दृश्यते। तस्मादभिन्नस्तन्तुभ्यः पट इति।

तान्येतान्यभेदसाधनान्यवीतानि।

एवमभेदे सिद्धे तन्तव एव तेन तेन संस्थानभेदेन परिणताः पटः, न तन्तुभ्योऽर्थान्तरं पटः। स्वात्मनि क्रियानिरोधबुद्धिव्यपदेशार्थक्रियाव्यवस्थाभेदाश्च नैकान्तिकं भेदं साधयितुमर्हन्ति। एकस्मिन्नपि तत्तद्विशेषाविर्भावतिरोभावाभ्यामेते-षामविरोधात्।

यथा हि कूर्मस्याङ्गानि कुर्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति चाविर्भवन्ति न तु कूर्मतस्तदङ्गान्युत्पद्यन्ते प्रध्वंसन्ते वा। एवमेकस्याः मृदः सुवर्णस्य वा घटमुकुटादयो विशेषा निःसरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते, निविशमानास्तिरोभवन्तो विनश्यन्तीत्युच्यन्ते। न पुनरसतामुत्पादः सतां वा

निरोधः। यथाह भगवान् कृष्णद्वैपायनः–

**''नासतो विद्यते भावो नाभावो विद्यते सतः''**–(गीता २/१६) इति।

यथा कूर्मः स्वावयवेभ्यः सङ्कोचविकासिभ्यो न भिन्नः, एवं घटमुकुटादयोऽपि मृत्सुवर्णादिभ्यो न भिन्नाः।

एवञ्च 'इह तन्तुषु पटः' इति व्यपदेशो यथा 'इह वने तिलकाः' इत्युपपन्नः। न चार्थक्रियाभेदोऽपि भेदमापादयति, एकस्यापि नानार्थक्रियादर्शनात्। यथैक एव वह्निर्दाहकः पाचकः प्रकाशकश्चेति। नाप्यर्थक्रियाव्यवस्था वस्तुभेदे हेतुः, तेषामेव समस्तव्यवस्तानामर्थक्रियाव्यवस्थादर्शनात्। यथा प्रत्येक विष्टयो वर्त्मदर्शनलक्षणामर्थ-क्रियां कुर्वन्ति, न तु शिविकावहनम्, मिलितास्तु शिविकामुद्वहन्ति, एवं तन्तवः, प्रत्येकं प्रावरणमकुर्वाणा अपि मिलिता आविर्भूतपटभावाः प्रावरिष्यन्ति।

स्यादेतत्–आविर्भावः पटस्य कारणव्यापारात् प्राक् सन् असन् वा? असंश्चेत्, प्राप्तं तर्ह्य सदुत्पादनम्। अथ सन्, कृतं तर्हि कारणव्यापारेण। न हि सति कार्ये कारणव्यापारप्रयोजनं पश्यामः। आविर्भावे चाविर्भावान्तरकल्पनेऽनवस्था-प्रसङ्गः। तस्मादाविर्भूतपटभावास्तन्तवः क्रयन्त इति रिक्त वचः? मैवम्। अथासदुत्पद्यत इति मते केयमसदुत्पत्तिः? सती असती वा? सती चेत्, कृतं तर्हि कारणैः। असती चेत् तस्या अप्युत्पत्त्यन्तरमित्यनवस्था। अथ उत्पत्तिः पटान्नार्थान्तरम् अपि तु पट एवासौ, तथापि यावदुक्तं भवति 'पटः' इति, तावदुक्त भवति 'उत्पद्यते'। इति। ततश्च 'पटः' इत्युक्ते 'उत्पद्यते' इति न वाच्यं, पौनरुक्त्यात्; 'विनश्यति' इत्यपि न वाच्यम्, उत्पत्तिविनाशयोर्युगपदेकत्र विरोधात्। तस्मादियं पटोत्पत्तिः स्वकारणसमवायो वा, स्वसत्तासमवायो वा। उभयथापि नोत्पद्यते अथ च तदर्थानि कारणानि व्यापार्यन्ते। एवं सत एव पटादेराविर्भावाय कारणापेक्षेत्युपपन्नम्। न च पटरूपेण कारणानां सम्बन्धः, तद्रूपस्याक्रियात्वात्, क्रियासम्बन्धित्वाच्च कारणानां, अन्यथा कारणत्वाभावात्।

तस्मात् सत्कार्यमिति पुष्कलम्।

## ( १० )

**हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगम्।**
**सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्॥ १०॥**

**अन्वय**–व्यक्तम्, हेतुमत्, अनित्यम्, अव्यापि, सक्रियम्, अनेकम्, आश्रितम्, लिङ्गम्, सावयवम्, परतन्त्रम् हेतुमदादिभ्यः विपरीतम्।

NOTES

NOTES

## सांख्यतत्त्वकौमुदी–

तदेवं प्रधानसाधनानुगुणं सत्कार्यमुपपाद्य यादृशं तत् प्रधानं साधनीयम्, तादृशमादर्शयितुं विवेकज्ञानोपयोगिनी व्यक्ताव्यक्तसारूप्यर्वरूप्ये तावदाह– ''हेतुमद्'' इति व्यक्तं हेतुमत् हेतुः, कारणम्, तद्वत्। यस्य च यो हेतुस्तसुपरिष्टाद्वक्ष्यति ''अनित्यम्'' विनाशि, तिरोभावीति यावत् ''अव्यापि'' सर्वं परिणामिनं न व्याप्नोति कारणेन हि कार्यमाविष्टम् न कार्येण कारणम्, न च बुद्ध्यादयः प्रधानं वेविषतीत्यव्यापकाः। ''सक्रियम'' परिस्पन्दवत्। तथा हि बुद्ध्यादयः उपात्तमुपात्तं देहं त्यजन्ति, देहान्तरं चोपाददते, इति तेषां परिस्पन्दः। शरीरपृथिव्यादीनां च परिस्पन्दः प्रसिद्ध एव। ''अनेकम्'' प्रतिपुरुष बुद्ध्यादीनां भेदात्। पृथिव्यादीनां शरीरघटादिभेदेनानेकमेव। ''आश्रितम्'' स्वकारणमाश्रितम्। बुद्ध्यादिकार्याणामभेदेऽपि कथञ्चिद्भेदविवक्षयाऽऽश्रया-श्रयिभावः, यथा 'इह वने तिलकाः' इत्युक्तम्। ''लिङ्गम्'' प्रधानस्य। यथा च ते बुद्ध्यादयः प्रधानस्य लिङ्गम् तथोपरिष्टाद्वक्ष्यति। प्रधान तु न प्रधानस्य लिङ्गं पुरुषस्य लिङ्ग भवदपीति भावः। ''सावयवम्'' अवयवनमवयव, अवयवानामवयविनां मिथः संश्लेषो मिश्रणं संयोग इति यावत्। अप्राप्तिपूर्विका प्राप्तिः संयोगः तेन सह वर्तत इति सावयवम्। तथा हि–पृथिव्यादयः परस्पर संयुज्यन्ते एवमन्येऽपि; न तु प्रधानस्य बुद्ध्यादिभिः संयोगः, तादात्म्यात्। नापि सत्त्वरजस्तमसां परस्परं संयोगः, अप्राप्तेरभावात्। ''परतन्त्र'' बुद्ध्यादि, बुद्ध्या स्वकार्येऽहङ्कारे जनयितव्ये प्रकृत्यापूरोऽपेक्ष्यते, अन्यथा क्षीणा सती नाऽलमहङ्कारं जनयितुमिति स्थितिः। एवमहङ्कारादिभिरपि स्वकार्यजनने इति सर्वं स्वकार्येषु प्रकृत्यापूरमपेक्षते तेन परां प्रकृतिमपेक्षमाणं कारणमपि स्वकार्यजनने परतन्त्रं व्यक्तम्।

विपरीतमव्यक्तम् व्यक्तात् अहेतुमत्, नित्य, व्यापि, निष्क्रियम्-यद्यप्यक्त-स्यास्ति परिणामलक्षणा क्रिया तथापि परिस्पन्दो नास्ति, एकम्, अनाश्रितम्, अलिङ्गम्, अनवयवम् स्वतन्त्रम्, अव्यक्तम्।

### ( ११ )

**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।**
**व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्॥ ११॥**

**अन्वय**–व्यक्तम् तथा प्रधानम् त्रिगुणम् अविवेकि, विषयः सामान्यम् अचेतनम्, प्रसवधर्मि (स्तः), पुमान् तद्विपरीतः तथा च (अस्ति)।

## सांख्यतत्त्वकौमुदी–

NOTES

तदनेन प्रबन्धेन व्यक्ताव्यक्तयोर्वैधर्म्यमुक्तम्, सम्प्रति तयोः साधर्म्यं पुरुषाच्च वैधर्म्यमाह–''त्रिगुणम्''। इति। त्रयो गुणाः सुखदुःखमोहाः अस्येति त्रिगुणम्। तदनेन सुखादीनामात्मगुणत्वं पराभिमतमपाकृतम्। ''अविवेकि''। यथा प्रधानं न स्वतो विविच्यते, एवं महदादयोऽपि न प्रधानात् विविच्यन्ते तदात्मकत्वात्। अथवा सम्भूयकारितात्राविवेकिता न हि किञ्चिदेकं पर्याप्तं स्वकार्ये, अपितु सम्भूय। तत्र नैकस्मात् यस्य कस्यचित् सम्भव इति।

ये त्वाहुः–विज्ञानमेव हर्षविषादमोहशब्दाद्यात्मकम्, न पुनरितोऽन्यस्तद्धर्मेति तान् प्रत्याह–''विषयः''। इति विषयः ग्राह्यः, विज्ञानात् बहिरिति यावत्। अतएव ''सामान्यं'' साधारणम्, घटादिवदनेकैः पुरुषैर्गृहीतमित्यर्थः। विज्ञानाकारत्वे तु असाधारण्याद्विज्ञानानां वृत्तिरूपाणां तेऽप्यसाधारणाः स्युः, विज्ञानं यथा परेण न गृह्यते, परबुद्धेरप्रत्यक्षत्वादित्यभिप्रायः। तथा च नर्तकीभ्रूलताभंगे एकस्मिन् बहूनां प्रति सन्धानं युक्तम् अन्यथा तन्न स्यादिति भावः।

''अचेतनम्'' सर्व एव प्रधानबुद्ध्यादयोऽचेतना, न तु वैनाशिकवत् चैतन्यं बद्धेरित्यर्थः। ''प्रसवधर्मि''–प्रसवरूपो धर्मो यः सोऽस्यास्तीति प्रसवधर्मि प्रसवधर्मेति वक्तव्ये मत्वर्थीयः प्रसवधर्मस्य नित्ययोगमाख्यातुम् सरूपविरूप-परिणामाभ्यां न कदाचिदापि वियुज्यते इत्यर्थः।

व्यक्तवृत्तमव्यक्तेऽतिदिशति–तथा प्रधानमिति। यथा व्यक्तं, तथा-व्यक्तमित्यर्थः। ताभ्यां वैधर्म्यं पुरुषस्याह–''तद्विपरीतः पुमान्'' इति। स्यादेतत् अहेतुमत्त्वनित्यत्वादि प्रधानसाधर्म्यमस्ति पुरुषस्य, एवमनेकत्वं व्यक्तसाधर्म्यम्, तत्कथमुच्यते ''तद्विपरीतः पुमान्'' इति? अत आह–''तथा च'' इति। चकारोऽप्यर्थः। यद्यप्यहेतुमत्त्वादिकं साधर्म्यम् तथाप्यत्रैगुण्यादिवैपरीत्यमस्त्ये-वेत्यर्थः।

### ( १२ )

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।**
**अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः॥ १२॥**

**अन्वय–**गुणाः प्रीत्यप्रीतिविषादात्मकाः। प्रकाशप्रवृत्तिनियमार्थाः अन्योन्याभि-भवाश्रयजननमिथुनवृत्तयः च।

## सांख्यतत्त्वकौमुदी

त्रिगुणमित्युक्तम्, तत्र के ते त्रयो गुण:, किं च तदुपलक्षणमित्यत आह 'गुणा:' इति परार्था:। 'सत्त्वं लघु प्रकाशकम्–' (का० १३) इत्यत्र च सत्त्वादय: क्रमेण निर्देक्ष्यन्ते। तदनागतावेक्षणेन तन्त्रयुक्त्या वा प्रीत्यादीनां यथासंख्यं वेदितव्यम्। एतदुक्तं भवति–प्रीति: सुखम्, प्रीत्यात्मक: सत्त्वगुण:। अप्रीति: दु:खम्, अप्रीत्यात्मको रजोगुणा:। विषादो मोह:, विषादात्मकस्तमोगुण: इत्यर्थ:।

ये तु मन्यते ''न प्रीतिर्दु:खाभावादतिरिच्यते एवं दु:खमपि न प्रीत्यभावादन्यदिति,'' तान् प्रति ''आत्म'' ग्रहणम्। नेतरेतराभावा: सुखादय:, अपि तु भावा:, आत्मशब्दस्य भाववचनत्वात्। प्रीतिरात्मा भावो येषां ते प्रीत्यात्मान:। एवमन्यदपि व्याख्येयम्। भावरूपता चैषामनुभवसिद्धा। परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याप्यसिद्धेरुभयासिद्धिरिति भाव:।

स्वरुपमेषामुक्त्वा प्रयोजनमाह–''प्रकाशप्रवृत्तिनियमार्था:'' इति। अत्रापि यथासंख्यमेव। रज: प्रवर्तकत्वात् सर्वत्र लघु सत्त्वं प्रवर्तयेत्, यदि तमसा गुरुणा न नियम्येत। तमोनियतं तु क्वचिदेव प्रवर्तयतीति भवति तमो नियमार्थम्।

प्रयोजनमुक्त्वा क्रियामाह–''अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च'' इति। वृत्ति: क्रिया, सा च प्रत्येकमभिसम्बध्यते। ''अन्योन्याभिभववृत्तय:''। एषामन्यतमेनार्थवशादुद्‌भूतेनान्यदभिभूयते। तथा हि–सत्त्वं रजस्तमसी अभिभूय शान्तामात्मनो वृत्तिं प्रतिलभते, एवं रज: सत्त्वतमसी अभिभूय घोराम्, एवं तम: सत्त्वरजसी अभिभूय मूढामिति। ''अन्योन्याश्रयवृत्तय:''। यद्यप्याधाराधेयभावेन नायमर्थो घटते, तथापि यदपेक्षया यस्य क्रिया स तस्याश्रय:। तथा हि–सत्वं प्रवृत्तिनियमावाश्रित्य रजस्तमसोप्रकाशेनोपकरोति, रज: प्रकाशनियमावाश्रित्य प्रवृत्त्या इतरयो:, तम: प्रकाशप्रवृत्ती आश्रित्य नियमेनेतरयोरिति। ''अन्योन्यजननवृत्तय:''। अन्यतमोऽन्यतमं जनयति। जननं च गुणानां सदृशरूप: परिणाम:। अत एव न हेतुमत्त्वम्, तत्त्वान्तरस्य हेतोरभावात्। नाप्यनित्यत्वम्, तत्त्वान्तरे लयाभावात्। ''अन्योन्यमिथुनवृत्तय:''। अन्योन्यसहचरा:। अविनाभाववृत्तय:, इति यावत्। 'च' समुच्चये।

### भवति चाऽत्रागम:–

**''अन्योन्यमिथुना: सर्वे सर्वे सर्वत्रगामिन:।**
**रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रज:॥**

**तमसश्चापि मिथुनं ते सत्त्वरजसीउभे।**
**उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते।**
**नैषामादिः सम्प्रयोगो वियोगो वोपलभ्यते''॥ इति**

*(दे० भा० ३/८)*

NOTES

## ( १३ )

**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।**
**गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः॥ १३॥**

**अन्वय**–सत्त्वम् लघु प्रकाशकम् इष्टम्, रजः चलम् उपष्टम्भकम् च, (इष्ट्म) तमः गुरु वरणकम् एव (इष्टम्) अर्थातः च (एषाम्), प्रदीपवत् वृत्तिः (अस्ति)।

## सांख्यतत्त्वकौमुदी–

"प्रकाशप्रवृत्तिनियमार्थाः'' इत्युक्तम्, तत्र के ते इत्थम्भूताः कुतश्चेत्यत आह–सत्त्वमिति। सत्त्वसेव लघु प्रकाशकमिष्टं सांख्याचार्यैः। तत्र कार्योद्गमने हेतुर्धर्मो लाघवं गौरवप्रतिद्वन्द्वि, यतोऽग्नेरूर्ध्वज्वलनं भवति। तदेव लाघवं कस्यचित्तिर्यग्गमने हेतुर्भवति, यथा वायोः। एवं करणानां वृत्तिपटुत्वहेतुर्लाघवम्, गुरुत्वे हि मन्दानि स्युरिति सत्त्वस्य प्रकाशात्मकत्त्वमुक्तम्।

सत्त्वतमसी स्वयमक्रियतया स्वकार्यप्रवृत्तिः प्रत्यवसीदतिी रजसोषष्टभ्येते–अवसादात्, प्रज्याव्य स्वकार्ये उत्साहं प्रयत्नं कार्येते। तदिदमुक्तम्–''उपष्टम्भकम्'' इति कस्मादित्यत उक्तम्–''चलम्'' इति। तदनेन रजसः प्रवृत्त्यर्थत्त्वं दर्शितम्।

रजस्तु चलतया परितस्त्रैगुण्यं चालयत् गुरुणाऽऽवृण्वता च तमसा तत्र-तत्र प्रवृत्तिप्रतिबन्धकेन क्वचिदेव प्रवर्त्यत इति ततस्ततो व्यावृत्त्या तमो नियामकमुक्तम्–''गुरु वरणकमेव तमः'' इति। एवकारः प्रत्येकं भिन्नक्रमः सम्बध्यते, सत्त्वमेव, रज, एव, तम एवेति।

ननु एते परस्परविरोधशीला गुणाः सुन्दोपसुन्दवत् परस्परं ध्वंसन्त इत्येव युक्तं प्रागेव तेषामेकक्रियाकर्तृताया इत्यत आह–''प्रदीपवच्चार्थतो वृत्तिः'' इति। दृष्टमेतत् यथा वर्तितैलेऽनलविरोधिनी, अथ मिलिते सहानलेन रूपप्रकाशलक्षणं कार्यं कुरुतः। यथा च वातपित्तश्लेष्माणः परस्परविरोधिनः शरीरधारणलक्षणकार्यकारिणः। एव सत्त्वरजस्तमांसि मिथो विरुद्धान्यप्यनुवर्त्स्यन्ति स्वकार्यं करिष्यन्ति च।

NOTES

''अर्थतः'' इति। पुरुषार्थतः इति यावत्, तथा च वक्ष्यति–

**''पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम्'' ( का० ३१ ) इति।**

अत्र च सुखदुःखमोहाः परस्परविरोधिनः स्वस्वानुरूपाणि सुख-दुखमोहात्मकान्येव निमित्तानि कल्पयन्ति। तेषां च परस्परमभिभाव्याभिभावक-भावान्नानात्वम्। तद्यथा–एकैव स्त्री रूपयौवनकुलशीलसम्पन्ना स्वामिनं सुखाकरोति, तत्कस्य हेतोः? स्वामिनं प्रति तस्याः सुखरूपसमुद्भवात्। सैव स्त्री सपत्नीर्दुःखाकरोति, तत् कस्य हेतोः? ताः प्रति तस्या दुःखरूपसमुद्भवात्। एवं पुरुषान्तरं तामविन्दमानं सैव मोहयति, तत् कस्य हेतोः? तं प्रति तस्या मोहरूपसमुद्भवात्। अनया च स्त्रिया सर्वे भावा व्याख्याताः।

तत्र यत् सुखहेतुः तत् सुखात्मकं सत्त्वम्, यत् दुःखहेतुस्तत् दुःखात्मकं रजः, यन्मोहहेतुस्तन्मोहात्मकं तमः। सुखप्रकाशलाघवानां त्वेकस्मिन् युगपदुद्भूतावविरोधः, सह दर्शनात्। तस्मात् सुखदुःखमोहैरिव विरोधिभिः, अविरोधभिरेकैकगुणवृत्तिभिः सुखप्रकाशलाघवैर्न निमित्तभेदा उन्नीयन्ते, एवं दुःखीषष्टम्भकत्त्रप्रवर्तकत्वैः, एवं मोहगुरुत्वावरणैः–इति सिद्धं त्रैगुण्यमिति।। १३।।

## ( १४ )

**अविवेक्यादेः सिद्धिस्त्रैगुण्यात् तद्विपर्ययाभावात्।**
**कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम्।। १४।।**

**अन्वय**–त्रैगुण्यात् तद्विपर्याभावात् (च) अविवेक्यादेः सिद्धिः कार्यस्य कारणगुणात्मकत्वात् (कार्यस्य) अव्यक्तमपि सिद्धम्।

## सांख्यतत्त्वकौमुदी–

स्यादेतत्–अनुभूयमानेषु पृथिव्यादिष्वनुभवसिद्धा भवन्त्वविवेकित्वादयः। ये पुनः सत्त्वादयो नानुभवपथमधिरोहन्ति, तेषां कुतस्त्यमविवेकित्वं विषयत्वम-चेतनत्वं प्रसवधर्मित्व च? इत्यत आह–''अविवेक्यादेः'' इति।

अविवेकित्वमविवेकि। यथा ''द्व्येकयोर्द्विवचनैकवचने'' (पा.मू. १/४/२२) इत्यत्र द्वित्वैकत्वयोरिति, अन्यथा द्व्यं केष्यिति स्यात्। कुतः पुनरविवेकित्वादेः सिद्धिरित्यत आह–''त्रैगुण्यात्'' इति। ''यद्यत् सुखदुःखमोहात्मकं तत्तदविवेकित्वादियोगि, यथेदमनुभूयमानं व्यक्तम्''–इति स्फुटत्वादन्वयो नोक्तः। व्यतिरेकमाह–'तद्विपर्ययाभावात्' इति अविवेक्यादिविपर्यये पुरुषे त्रैगुण्याभावात्

अथवा व्यक्ताव्यक्ते पक्षीकृत्यान्वयाभावेनावीत एव हेतुस्त्रैगुण्यादिति वक्तव्यः। स्यादेतत्–अव्यक्तसिद्धौ सत्यां तस्याविवेकित्वादयो धर्माः सिध्यन्ति, अव्यक्तमेव त्व्द्यापि न सिध्यति, तत्कथमविवेकित्वादिसिद्धिरत आह–''कारणागुणत्मकत्वात्'' इति। अयमभिसन्धिः–कार्यं हि कारणगुणात्मकं दृष्टम्, यथा तन्वादिगुणात्मकं पटादि, तथा महदादिलक्षणेनापि कार्येण सुखदुःखमोहरूपेण स्वकारणं सुखदुःखमोहात्मकं प्रधानमव्यक्तं सिद्ध भवति।

## ( १५ )

**भेदानां परिमाणात्, समन्वयात् शक्तितः प्रवृत्तेश्च।**
**कारणकार्यविभागादविभागाद् वैश्वरूप्यस्य॥ १५॥**

**अन्वय–**भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेः च कारणकार्यविभागात् वैश्वरूप्यस्य अविभागात् (अव्यक्तं कारणम् अस्ति)।

## सांख्यतत्त्वकौमुदी–

स्यादेतत्–'व्यक्तात् व्यक्तमुत्पद्यते' इतिकणभक्षाक्षचरणतनयः। परमाणवो हि व्यक्ताः, तेभ्यो द्वयणुकादिक्रमेण पृथिव्यादिलक्षणं कार्य व्यक्तमारभ्यते। पृथिव्यादिषु च कारणगुणक्रमेण रूपाद्युत्पत्तिः। तस्मात् व्यक्तात् व्यक्तस्य तद्‌गुणस्य चोत्पत्तेः कृतमदृष्टचरेणव्यक्तेनेत्यत आह–'भेदानां परिमाणात् इत्यादि।

भेदानां–विशेषाणां महदादीनां भूम्यन्तानां कार्याणां–कारणं मूलकारणमस्त्य-व्यक्तम्। कुतः? ''कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य''। कारणे सत् कार्यमिति स्थितम्। तथा च यथा कूर्मशरीरे सन्त्येवाङ्गानि निःसरन्ति विभज्यन्ते–'इदं कूर्मशरीरं, एतान्येतस्याङ्गानि'–इति, एवं निविशमानानि तस्मिन् अव्यक्तीभवन्ति; एवं कारणान्मृत्पिण्डाद्धेमपिण्डाद्वा कार्याणि घटमुकुटादीनि सन्त्येवाऽऽविर्भवन्ति विभज्यन्ते। सन्त्येव पृथिव्यादीनि कारणात्तन्मात्रादाविर्भवन्ति विभज्यन्ते, सन्त्येव च तन्मात्राण्यहङ्कारात् कारणात्, सन्नेवाहङ्कारः, कारणान्मतः सन्नेव च महान् परमाव्यक्तात्। सोऽयं कारणात् परमाव्यक्तात् साक्षात् पारम्पर्येणान्वितस्य विश्वस्य कार्यस्य विभागः।

प्रतिसर्गे तु मृत्पिण्डं सुवर्णपिण्डं वा घटमुकुटादयो विशन्तोऽव्यक्तीभवन्ति। तत्कारणरूपमेवानभिव्यक्त कार्यमपेक्ष्याव्यक्तं भवति। एवं पृथिव्यादयस्तन्मात्राणि विशन्तः स्वापेक्षया तन्मात्राण्यव्यक्तयन्ति। एवं तन्मात्राण्यहंकारं

NOTES

NOTES

विशन्त्यहङ्कारमव्यक्तयन्ति, एवमहङ्कारो महान्तमाविशन् महान्तमव्यक्तयति, महान् प्रकृतिं स्वकारणं विशन् प्रकृतिमव्यक्तयति। प्रकृतेस्तु न क्वचिन्निवेश इति सा सर्वकार्याणामव्यक्तमेव। सोऽयमविभागः प्रकृतौ, वैश्वरूप्यस्य नानारूपस्य कार्यस्य, स्वार्थिकः, ष्यञ्। तस्मात् कारणे कार्यस्य सत एव विभागाविभागाभ्यामव्यक्तं कारणमस्ति।

इतश्चाव्यक्तमस्तीत्याह–''शक्तितः प्रवृत्तेश्च'' इति। कारणशक्तितः कार्यं प्रवर्तत इति सिद्धम्, अशक्तात् कारणात् कार्यस्यानुत्पत्तेः। शक्तिश्च कारणमता न कार्यस्याव्यक्तत्वादन्या, न हि सत्कार्यपक्षे कार्यस्याव्यक्तताया अन्यस्यां शक्तौ प्रमाणमस्ति। अयमेव हि सिकताभ्यस्तिलानां तैलोपादानानां भेदो यदेतेष्वेव तैलमस्त्यनागतावस्थं, न सिकतास्विति।

स्यादेतत्–शक्तितः प्रवृत्तिः कारणकार्यविभागाविभागौ च महत एव परमाव्यक्तत्वं साधयिष्यतः कृतं ततः परेणाव्यक्तेनेत्यत आह–''परिमाणात्'' इति। परिमितत्वात् अव्यापित्वादिति यावत्। विवादाध्यासिता महदादिभेदा अव्यक्तकारणवन्तः, परिमितत्वात् घटादिवत्। घटादयो हि परिमिताः मृदाद्यव्यक्तकारणका दृष्टाः। उक्तमेतद्यथा कार्यस्याव्यक्तावस्था कारणमेवेति यन्महतः कारणं तत् परमाव्यक्तम्, ततः परतराव्यक्तकल्पनायांप्रमाणाभावात्।

इतश्च विवादाध्यासिता भेदाः अव्यक्तकारणवन्तः, ''समन्वयात्''। भिन्नानां समानरूपता समन्वयः। सुखदुःखमोहसमन्विता हि बुद्ध्यादयोऽध्य-वसायादिलक्षणाः प्रतीयन्ते। यानि च यद्रूपसमनुगतानि, तानि तत्स्वभावाव्यक्त-कारणकानि, यथा मृद्धेमपिण्डसमनुगता घटमुकुटादयो मुद्धेमपिण्डाव्यक्तकारणका इति कारणमस्त्यव्यक्तं भेदानामिति सिद्धम्।

## ( १६ )

**कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च।**
**परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात्।। १६।।**

**अन्वय–**त्रिगुणतः, समुदयात् च प्रवर्तते, परिणामतः सलिलवत्, प्रतिप्रति-गुणाश्रयविशेषात् (अव्यक्तं कारणम् अस्ति)

## सांख्यतत्त्वकौमुदी–

अव्यक्तं साधयित्वा तस्य प्रवृत्तिप्रकारमाह–''प्रवर्तते त्रिगुणतः'' इति प्रतिसर्गावस्थायां सत्त्वं रजस्तमश्च सदृशपरिणामानि भवन्ति। परिणामस्वभावा

हि गुणा नापरिणम्य क्षणमप्यवतिष्ठन्ते। तस्मात् सत्त्वं सत्त्वरूपतया, रजोरूपतया, तमस्तमोरूपतया प्रतिसर्गावस्थायामपि प्रवर्तते। तदिदमुक्तं–''त्रिगुणतः'' इति।

प्रवृत्त्यन्तरमाह–'समुदयाच्च' इति। समेत्य उदयः समुदयः–समवायः। समुदयश्च गुणानां न गुणप्रधानभावमन्तरेण सम्भवति। न च गुणप्रधानभावो वैषम्यं विना, न च वैषम्यमुपमर्द्योपमर्दकभावादृते, इति महदादिभावेन प्रवृत्ति-द्वितीया।

स्यादेतत्, कथमेकरूपाणां गुणानामनेकरूपा प्रवृत्तिरित्यत आह–'परिणामतः सलिलवत्' इति। यथा हि वारिदविमुक्तमुदकमेकरसमपि तत्तद्भूविकारनासाद्य नारिकेलतालतालीबिल्वचिरबिल्वतिन्दुकामलकप्राचीना मलककपित्थफलरसतया परिणमन्मधुराम्ललवणतिक्तकषायकटुतया विकल्पते, ऐवमेकैकगुणसमुद्भवात् प्रधानं गुणमाश्रित्याप्रधानगुणाः परिणामभेदान् प्रवर्तयन्ति। तदिदमुक्तम्–'प्रतिप्रतिगुणाश्रयविशेषात्'। एकैकगुणाश्रयेण यो विशेषस्तस्मादित्यर्थः।।१६।।

## (१७)

**संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।**
**पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च।। १७।।**

**अन्वय**–संघातपरार्थत्वात् त्रिगुणादिविपर्ययात् अधिष्ठानात् भोक्तृभावात् कैवल्यार्थम् प्रवृत्तेः। च पुरुषः अस्ति।

## सांख्यतत्त्वकौमुदी–

ये तु तौष्टिका अव्यक्तं वा महान्तं वाऽहङ्कारं वा इन्द्रियाणि वा भूतानि वाऽत्मानमभिमन्यमानास्तान्येवोपासते तान् प्रत्याह–संघातपरार्थत्वादिति। 'संघातपरार्थत्वात्' इति। पुरुषोऽस्ति, अव्यक्तादेर्व्यतिरिक्तः, कुतः? संघातपरार्थत्वात्'। अव्यक्तमहदहङ्कारादयः परार्थाः संघातत्वात्, शयनासनाभ्यङ्गादिवत्। सुखदुःखमोहात्मकतयाऽव्यक्तादयः सर्वे संङ्घाताः।

स्यादेतत् शयनासनादयः संघाताः संहतशरीराद्यर्था दृष्टा न त्वात्मानमव्यक्ताद्यतिरिक्तं प्रति परार्थाः। तस्मात् संघातान्तरमेव परं गमयेयुः, न त्वसंहतमात्मानमित्यत् आह–'त्रिगुणादिविपर्ययात्' इति। अयमभिप्रायः–संघातान्तरार्थत्वे हि तस्यापि संघात्वात् तेनापि संघातान्तरार्थेन भवितव्यम्। एवं तेन तेनेत्यनवस्था स्यात्, न च व्यवस्थायां सत्यामनवस्था युक्ता, कल्पनागौरवप्रसङ्गात्। न च 'प्रमाणबलेन कल्पनागौरवमपि मृष्यते' इति

NOTES

NOTES

युक्तम्, संहतत्वस्य पारार्थ्यमात्रेणान्वयात्। दृष्टान्तदृष्टसर्वधर्मानुरोधेन त्वनुमानमिच्छतः सर्वानुमानोच्छेदप्रसंग इत्युपपादितं न्यायवार्तिक-तात्पर्यटीकायामस्माभिः। तस्मादनवस्थाभि–याऽस्यासंघाततत्वमिच्छताऽत्रिगुणत्वं विवेकित्वमविषयत्वमसामान्यत्वं चेतनत्वमप्रसवधर्मित्वं चाभ्युपेयम्। त्रिगुणत्वादयो हि धर्मोः संहत्वेन आप्ताः। तत्संसहतत्वमस्मिन् परे व्यावर्त्यमानं त्रैगुण्यादि व्यावर्तयति, ब्राह्मणत्वमिव व्यावर्त्यमानं कठत्वादिकम्। तस्मादाचार्येण 'त्रिगुणादिविपर्ययात्' इति वदतासंहतः परो विवक्षितः, स चात्मेति सिद्धम्।

इतश्च पुरुषोऽक्ति–'अधिष्ठानात्'। त्रिगुणात्मकानामधिष्ठीयमानत्वात्। यद्यत्सुखदुःखमोहात्मकं तत्सर्व परेणाधिष्ठीयमानं इष्टम्, यथा रथादि यन्त्रादिभिः। सुखदुःखमोहात्मकं चेदं बुद्ध्यादि, तस्मादेतदपि परेणाधिष्ठातव्यम्। स च परस्त्रैगुण्यादन्य आत्मेति।

इतश्चास्ति पुरुषः–''भौक्तृभावात्। भोक्तृभावेन भोग्ये सुख दुःखे उपलक्षयति। भोग्ये हि सुख दुःखे अनुकूल–प्रतिकूलवेदनीये प्रत्यात्ममनुभूयते। तेनानयोरनुकूलनीयेन प्रतिकूलनीयेन च केनचिदप्यन्येन भवितव्यम्। न चानुकूलनीयाः प्रतिकूलनीया वा बुद्ध्यादयः, तेषां सुखदुःखाद्यात्मकत्वेन स्वात्मनि वृत्तिविरोधात्। तस्मात् योऽसुखाद्यात्मा सोऽनुकूलनीयः, प्रतिकूलनीयो वा, स चात्मेति।''

अन्ये स्वाहुः–भोग्या दृश्या बुद्ध्यादयः। न च द्रष्टारमन्तरेण दृश्यता युक्ता तेषाम्। तस्मादस्ति द्रष्टा दृश्यबुद्ध्याद्यतिरिक्तः, स चामेति। भोक्तृभावात्द्रष्ट्टभावात्, दृश्येन, द्रष्टुरनुमानादित्यर्थः। दृश्यत्वं च बद्ध्यादीनां सुखाद्यात्मकतया पृथिव्यादिवदनुमितम्।

इतश्चास्ति पुरुष इत्याह–''कैवल्यार्थ प्रवृत्तेश्च''। शास्त्राणां महर्षीणां दिव्यलोचनानां च कैवल्यमात्यन्तिकदुःखत्रयप्रशयनलक्षणं न बुद्ध्यादीनां सम्भवति। ते हि दुःखाद्यात्मकाः कथं स्वभावाद्वियोजयितुं शक्यन्ते। तदतिरिक्तस्य त्वतदात्मनस्ततो वियोगः शक्यसम्पादः। तस्मात् कैवल्यार्थ प्रवृत्तेरागमानां महाधियां चास्ति बुद्ध्यादिव्यतिरिक्त आत्मेति सिद्धम्।। १७।।

## ( १८ )

**जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।**
**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव।। १८।।**

**अन्वय**–जननमरणकरणाम् प्रतिनियमात् अयुगपत् प्रवृत्तेः च त्रैगुण्यविपर्ययात् च पुरुषबहुत्वम् सिद्धम् एव।

NOTES

## सांख्यतत्त्वकौमुदी

तदेवं पुरुषास्तित्वं प्रतिपाद्य, स किं सर्वशरीरेषु एकः किमनेकः प्रतिक्षेत्रमिति संशये, तस्य प्रतिक्षेत्रमनेकत्वं प्रतिपादयति–'जननेत्यादिता'–

''पुरुषबहुत्वं सिद्धम्''। कस्मात्? जननमरणकरणानां प्रतिनियमात्। निकायविशिष्टाभिरपूर्वाभिर्देहेन्द्रियमनोऽहङ्कारबुद्धिवेदनाभिः पुरुषस्याभिसम्बन्धो जन्म, न तु पुरुषस्य परिणामः, तस्यापरिणामित्वात्। तेषामेव च देहादीनामुपात्तानां परित्यागो मरणम्, नत्वात्मनो विनाशः, तस्य कूटस्थनित्यत्वात्। करणानि बुद्ध्यादीनि त्रयोदश। तेषां जननमरणकरणानां प्रतिनियमो व्यवस्था। सा खल्वियं सर्वशरीरेषु एकस्मिन् पुरुषे नोपपद्यते। तदा खल्वेकस्मिन् पुरुषे जायमाने सर्वे जायेरन्, म्रियमाणे च म्रियेरन्, अन्धादौ चैकस्मिन् सर्व एव अन्धादयः, विचित्ते चैकस्मिन् सर्व एव विचित्ताः स्युरित्यव्यवस्था स्यात्; प्रतिक्षेत्रं तु पुरुषभेदे भवति व्यवस्था। न च एकस्यापि पुरुषस्य देहोपाधानभेदाद् व्यवस्था इति युक्तम्, पाणिस्तनाद्युपाधिभेदेनापि जन्ममरणादिव्यवस्थाप्रसङ्गात्। न हि पाणौ वृक्णे, जाते या स्तनादौ महत्यवयवे युवतिर्मृता जाता वा भवतीति।

इतश्च प्रतिक्षेत्रं पुरुषभेद इत्याह–''अयुगपत्प्रवृत्तेश्च'' इति। प्रवृत्तिः प्रयत्नलक्षणा यद्यप्यन्तः करणवर्तिनी, तथापि पुरुषे उपचर्यते। तथा च तस्मिन्नेकत्र शरीरे प्रयतमाने, स एव सर्वशरीरेषु एक इति सर्वत्र प्रयतेत, ततश्च सर्वाण्येव शरीराणि युगपच्चालयेत्। नानात्वे तु नायं दोष इति।

इतश्च पुरुषभेद इत्याह–''त्रैगुण्यविपर्ययाच्चैव'' इति। एवकारो भिन्नक्रमः 'सिद्धम्' इत्यस्नान्तरं द्रष्टव्यः सिद्धमेव नासिद्धम्। त्रयो गुणास्त्रैगुण्यम्, तस्य विपर्ययोऽन्यथात्वम्। केचिखलु सत्त्वनिकायाः सत्त्वबहुलाः, यथोर्ध्वस्रोतसः केचिद्रजोबहुलाः, यथा मनुष्याः, केचित्तमोबहुलाः यथा तिर्यग्योनयः। सोऽयमीदृशस्त्रैण्यविपर्ययोऽन्यथाभावस्तेषु सत्त्वनिकायेषु न भवेत् यद्येक स्यात्, पुरुषभेदे त्वयमदोष इति।

## ( १९ )

**तस्माच्च विपर्यासात् सिद्ध साक्षित्वमस्य पुरुषस्य।**
**कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च॥ १९॥**

NOTES

**अन्वय**–तस्मात् विपर्यासात् च अस्य पुरुषस्य साक्षित्वम् सिद्धम् (तथैव) द्रष्टृत्वम् कैवल्यम् माध्यस्थ्यम् अकर्तृभावः च (अपि)।

**बालहुताशनतत्त्वः स्वयमकृतानां यथाहि भोक्तारः।**
**पुरुषोऽपि विषयफलानां स्वयमकृतानां तथैव भोक्ता॥**

*(जयमंगलाटीका से)*

## सांख्यतत्त्वकौमुदी–

एवं पुरुषबहुत्वं प्रसाध्य विवेकज्ञानोपयोगितया तस्य धर्मानाह– 'तस्माच्च' इति।

'च' शब्दः पुरुषस्य बहुत्वेन सह धर्मान्तराणि समुच्चिनोति। 'विपर्यासादस्मात्' इत्युक्ते त्रैगुण्यविपर्ययादित्यनन्तरोक्तं सम्बध्येत अतस्तन्निरासाय 'तस्मात्' इत्युक्तम्। अनन्तरोक्तं हि सन्निधानादिदमो विषयो, विप्रकृष्टं च तदः, इति विप्रकृष्टं त्रिगुणमविवेकीत्यादि सम्बन्ध्यते तस्मात्त्रिगुणादेर्यो विपर्यासः स पुरुषस्यात्रिगुणत्वं विवेकित्वमविषयत्वमसाधारणत्वं चेतनत्वमप्रसवधर्मित्वञ्च।

तत्र चेतनत्वेनाविषयत्वेन च साक्षित्वद्रष्टुत्वे दर्शिते। चेतनो हि द्रष्टा भवति, नाचेतनः, साक्षी च दर्शितविषयो भवति, यस्मै प्रदर्श्यते विषयः स साक्षी। तथा हि लोकेप्रार्थिप्रत्यर्थिनौ विवादविषयं साक्षिणे दर्शयतः, एवं प्रकृतिरपि स्वचरितं विषयं पुरुषाय दर्शयतीति पुरुषः साक्षी। न चाचेतनो विषयो वा शक्यो विषयं दर्शयितुम्, इति चैतन्यादविषयत्वाच्च भवति साक्षी। अत एव द्रष्टापि भवति। अत्रैगुण्याच्चास्य। कैवल्यम् आत्यन्तिको दुःखत्रयाभावः कैवल्यम्। तच्च तस्य स्वाभाविकादेवात्रैगुण्यात् सुखदुःखमोहरहितत्वात्सिद्धम्। अत एवात्रैगुण्यान्माध्यस्थ्यम्। सुखी हि सुखेन तृप्यन् दुःखी हि दुःखं द्विषन् मध्यस्थो न भवति। तदुभयरहितस्तु मध्यस्थ इत्युदासीन इति चाख्यायते। विवेकित्वादप्रसवधर्मित्वाच्चाकर्तेति सिद्धम्॥ १९॥

## ( २० )

**तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।**
**गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः॥ २०॥**

**अन्वय**–तस्मात् तत्संयोगात् अचेतनम् लिङ्गम् चेतनावत् इव तथा च गुणकर्तृत्वे उदासीनः (पुरुषः) कर्ता इव भवति।

NOTES

## सांख्यतत्त्वकौमुदी–

स्यादेतत्–प्रमाणेन कर्त्तव्यमर्थमवगम्य 'चेतनोऽहं चिकीर्षन् करोमि' इति कृतिचैतन्ययोः सामानाधिकरण्यमनुभवसिद्धम्, तदेतस्मिन्मते नावकल्पते चेतनस्याकर्तृत्वात् कर्त्तुश्चाचैतन्यात्, इत्यत आह–'तस्मात्' इति।

यतश्चैतन्यकर्तृत्वे भिन्नाधिकरणे युक्तितः सिद्धेः, तस्मात् भ्रान्तिरियमित्यर्थः भ्रान्तिबीजं 'तत्संयोगः' तत्सन्निधानम्। 'लिङ्गम्' महदादिसूक्ष्मपर्यन्तं वक्ष्यति। अतिरोहितार्थमन्यत्।। २०।।

## ( २१ )

**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य**
**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।। २१।।**

**अन्वय–**(पुरुषेण) प्रधानस्य दर्शनार्थम् तथा (प्रधानेन) पुरुषस्य कैवल्यार्थम् पङ्ग्वन्धवत् उभयोः संयोगः (भवति) तत्कृतः (च) सर्गः (भवति)।

## सांख्यतत्त्वकौमुदी–

''तत्संयोगात्' इत्युक्तम्, न च भिन्नयोः संयोगोऽपेक्षां विना, न चेयमुपकार्योपकारकभाव विनेत्यपेक्षाहेतुमुपकारमाह–'पुरुषस्य' इति।

प्रधानस्येति कर्मणि षष्ठी। प्रधानस्य सर्वकारणस्य यद्दर्शनं पुरुषेण तदर्थम्। तदनेन भोग्यता प्रधानस्य दर्शिता। ततश्च भोग्यं प्रधानं भोक्तारमन्तरेण न सम्भवतीति। पुरुषस्यापेक्षां दर्शयति–''पुरुषस्य कैवल्यार्थम्'' इति। तथा हि–भोग्येन प्रधानेन सम्भित्रः पुरुषस्तद्गतं दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यं प्रार्थयते। तच्च सत्त्वपुरुषान्यताख्यातिनिबन्धनम्। न स सत्त्वपुरुषान्यताख्यातिः प्रधानमन्तरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते। अनादित्वाच्च संयोगपरम्पराया भोगाय संयुक्तोऽपि कैवल्याय पुनः संयुज्यत इति युक्तम्। ननु भवत्वनयोः संयोगः, महदादिसर्गस्तुकृत इत्यत आह–''तत्कृतः सर्गः'' इति संयोगो हि न महदादिसर्गमन्तरेण भोगाय कैवल्याय च पर्याप्त इति संयोग एव भोगापवर्गार्थं सर्गं करोतीत्यर्थः।। २१।।

## ( २२ )

**प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः।**
**तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि।। २२।।**

NOTES

**अन्वय**–प्रकृतेः महान् (अभिव्यज्यते) ततः अहंकार, तस्मात् च षोडशकः गणः तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि।

## सांख्यतत्त्वकौमुदी–

सर्गक्रममाह 'प्रकृतेर्महान्' इत्यादिना। प्रकृतिः अव्यक्तम्। महदहकारौ वक्ष्यमाणलक्षणौ। एकादशेन्द्रियाणि वक्ष्यमाणानि तन्मात्राणि च पंच, सोऽयं षोडशसङ्ख्यापरिमितो गणः षोडशकः। तस्मादपि षोडशकादपकृष्टेभ्यः पञ्चभ्यस्तन्मात्रेभ्यः पञ्च भूतान्याकाशादीनि। तत्र शब्दतन्मात्रादाकाशं शब्दगुणम्, शब्दतन्मात्रसहितात् स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणः शब्दस्पर्शतन्मात्रासहितात् रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणम्, शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्रादापः शब्दस्पर्शरूपरसगुणाः शब्दस्पर्शरूपरसतन्मात्रसहिताद् गन्धतन्मात्राच्छब्दस्पर्शरूप-रसगन्धगुणा पृथिवी जायते इत्यर्थः।। २२।।

## ( २३ )

**अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।**
**सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्।। २३।।**

**अन्वय**–अध्यवसायः बुद्धिः धर्मः ज्ञानम् विरागः ऐश्वर्यम् एतत् (अस्याः) सात्त्विकम् रूपम् अस्मात् विपर्यस्तम् तामसम्।

## सांख्यतत्त्वकौमुदी–

अव्यक्तं सामान्यतो लक्षितं "तद्विपरीतमव्यक्तम्" (का० १०) इत्यनेन, विशेषतश्च "सत्त्वं लघु प्रकाशकम्" (का० १३) इत्यनेन। व्यक्तमपि सामान्यतो लक्षितं "हेतुमत्" (का० १२) इत्यनेन। सम्प्रति विवेकज्ञानोपयोगितया व्यक्तविशेषं बुद्धि लक्षयति–"अध्यवसायः" इति।

'अध्यवसायो बुद्धिः' क्रियाक्रियावतोरभेदविवक्षया। सर्वो व्यवहर्ताऽऽलोच्य मत्वा 'अहमत्राधिकृतः' इत्यभिमत्य 'कर्तव्यमेतन्मया' इत्यध्यवस्यति, ततश्च प्रवर्तते इति लोकसिद्धम्। तत्रयोऽयं कर्तव्यमिति विनिश्चयश्चितिसन्निधाना-दापन्नचैतन्याया बुद्धेः सोऽध्यवसायः–बुद्धेरसाधारणो व्यापारः तदभेदा बुद्धिः। स च बुद्धेर्लक्षणं, सामानासमानजातीयव्यवच्छेदकत्वात्।

तदेवं बुद्धिं लक्षयित्वा विवेकज्ञानोपयोगिनस्तस्या धर्मान् सात्त्विकतामसानाह–"धर्मो ज्ञानं विरागं ऐश्वर्यम्। सात्त्विकमेतद् रूपं तामसमस्माद्विपर्यस्तम्" इति। धर्मः अभ्युदयनिःश्रेयसहेतुः। तत्र यागदानाद्यनुष्ठानजनितो धर्मोऽभ्युदयहेतुः,

अष्टाङ्गयोगानुष्ठानजनितश्च निःश्रेयसहेतुः। गुणपुरुषान्यताख्यातिर्ज्ञानम्। विरागो वैराग्यं रागाभावः तस्य—यतमानसंज्ञा, व्यतिरेकसंज्ञा, ऐकेन्द्रियसंज्ञा, वशीकारसंज्ञा—इति चतस्रः संज्ञाः।

रागादयः कषायाश्चित्तवर्तिनः तैरिन्द्रयाणि यथास्वं विषयेषु प्रवर्त्यन्ते। तन्मा प्रवर्तिषत विषयेष्विन्द्रियाणीति तत्परिपाचनायारम्भः प्रयत्नोयतमानसंज्ञा। परिपाचने चानुष्ठीयमाने केचित्कषायाः पक्वाः, पक्ष्यन्ते च केचित्। तत्रैवं पूर्वापरीभावे सति पक्ष्यमाणेभ्यः कषायेभ्यः पक्वानां व्यतिरेकेणावधारणं व्यतिरेकसंज्ञा। इन्द्रियप्रवृत्यसमर्थतया पक्वानामौत्सुक्यमात्रेण मनसि व्यवस्थापनमेकेन्द्रियसंज्ञा। औत्सुक्यमात्रस्यापि निवृत्तिरुपस्थितेष्वपि दृष्टानुश्रविकविषयेषु या संज्ञात्रयात् पराचीना सा वशीकारसंज्ञा। यामत्रभवान् पतञ्जलिर्वर्णयाञ्चकार—''दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् इति (यो० सू० १/१६)''। सोऽयं बुद्धिधर्मो विरोग इति।

ऐश्वर्यमपि बुद्धिधर्मः, यतोऽणिमादिप्रादुर्भावः। अत्राणिमा—अणुभावः, यतः शिलामपि प्रविशति। लघिमा—लघुभावः, यतः सूर्यमरीचीनालम्ब्य सूर्यलोकं याति। गरिमा—गुरुभावः, यतो गुरुर्भवति। महिमा—महतो भावः यतो महान् भवति। प्राप्तिः, यतोऽङ्गुल्यग्रेण स्पृशति चन्द्रमसम्। प्रकाम्यम्—इच्छानभिघातः यतो भूमावृन्मज्जति निमज्जति च, यथोदके। वशित्वम्, यतो भूतभौतिकं वशीभवत्यवश्यम्। ईशित्वम्, यतो भूतभौतिकानां प्रभवस्थितिलपानामीष्टे। यच्च कामावसायित्वं सा सत्यसंकल्पता, येन यथास्य संकल्पो भवति भूतेषु, तथैव भूतानि भवन्ति। अन्येषां मनुष्याणां निश्चयाः निश्चेतव्यमनुविधीयन्ते, योगिनस्तु निश्चेतव्याः पदार्था निश्चयम्। इति चत्वारः सात्त्विका बुद्धिधर्माः, तामसास्तु तद्विपरीता बुद्धिधर्माः अघर्माज्ञानावैराग्यानैश्वर्याभिधानाश्चत्वार इत्यर्थः।। २३।।

## ( २४ )

**अभिमानोऽहङ्कारःतस्माद्द्विविधः प्रवर्तते सर्गः।**
**एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव।। २४।।**

**अन्वय**—अभिमानः अहङ्कारः तस्मात् एव द्विविधः सर्गः प्रवर्तते एकादशकः गणः च तन्मात्रपञ्चकश्च।। २४।।

## सांख्यतत्त्वकौमुदी—

अहङ्कारस्य लक्षणमाह—'अभिमान' इति। 'अभिमानोऽहङ्कारः।' यत् खल्वालोचितं मतं च तत्र अहमधिकृतः, शक्तः खल्वहमत्र, 'मदर्था एवामी

विषयाः मत्तो नान्योऽत्राधिकृतः कश्चिदस्ति अतोऽहमस्मि' इति योऽभिमानः सोऽसाधारणव्यापारत्वादहङ्कारः। तमुपजीव्य हि बुद्धिरध्यवस्यति– 'कर्त्तव्यमेतन्मया' इति। तस्य 'कार्यभेदमाह–' ''तस्माद् द्विविधः प्रवर्तते सर्गः'' इति। प्रकारद्वमाह–''एकादशकश्च गणः'' इन्द्रियाह्वयः, ''तन्मात्रपञ्चकश्चैव''। द्विविध एव सर्गोऽहङ्कारात् न त्वन्य इति 'एव' कारेणावधारयति।। २४।।

## ( २५ )

**सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्।**
**भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्।। २४।।**

**अन्वय**–वैकृतात् अहङ्कारात् सात्त्विकः एकादशकः (गणः) प्रवर्तते भूतादेः अहङ्कारात् तन्मात्रः स तामसः तैजसात् उभयम्।

## सांख्यतत्त्वकौमुदी–

स्यादेतत्, अहङ्कारादेकरूपात्कथं जडप्रकाशकौ गणौ विलक्षणौ भवत इत्यत आह-सात्विक इति। प्रकाशलाघवाभ्यामेकादशक इन्द्रियगणः सात्विको वैकृतात्सात्विकादङ्कारात्प्रवर्तते। भूतादेस्त्वहङ्कारात्तामसात्तन्मात्रो गणः प्रवर्तते। कस्मात्? यतः 'स तामसः'। एतदुक्तम्भवति, यद्यप्येकोऽहङ्कारस्तथापि गुणभेदोद्भवाभिभवाभ्यां भिन्नं कार्यं करोतीति। ननु यदि सत्त्वतमोभ्यामेव सर्वं कार्यं जन्यते तदा कृतमकिञ्चित्करेण रजसेत्यत आह–''तैजसादुभयम्'' इति। तैजसात् राजसादुभयं भवति। यद्यपि रजसो न कार्यान्तरमस्ति, तथापि सत्त्वतमसी स्वयमक्रिये समर्थे अपि न स्वस्वकार्यं कुरुतः रजस्तु चलतया ते यदा चालयति तदा स्वकार्यं कुरुत इति। तदुभयस्मिन्नपि कार्ये सत्त्वतमसोः क्रियोत्पादनद्वारेणारित रजसः कारणत्वमिति न व्यर्थ रज इति।। २५।।

## ( २६ )

**बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि।**
**वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः।। २६।।**

## सांख्यतत्त्वकौमुदी–

सात्त्विकाहङ्कारोपादनकत्वमिन्द्रियत्वम्। तच्च द्विविधं–बुद्धीन्द्रियं, कर्मेन्द्रियं च। उभयमप्येतत् इन्द्रस्यात्मनश्चिह्नत्वादिन्द्रियमुच्यते। तानि च स्वसंज्ञा-भिश्चक्षुरादिभिरुक्तानि। तत्र रूपग्रहणलिङ्गं 'चक्षुः' शब्दग्रहणलिङ्गंश्रोत्रम्,

गन्धग्रहणलिङ्गंघ्राणम्, रसग्रहणलिङ्गंरसनम्, स्पर्शग्रहणलिङ्गत्वक् इति ज्ञानेन्द्रियाणां संज्ञा। एवं वागादीनां कार्यं वक्ष्यति।। २६।।

NOTES

## ( २७ )

**उभयात्मकमत्र मनः सङ्कल्पमिन्द्रियं च साधर्म्यात्।**
**गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च।। २७।।**

**अन्वय**–अत्र मनः उभयात्मकम् संकल्पकम् च इन्द्रियम् साधर्म्यात् (च इव) गुण परिणाम विशेषात् नानात्वम् बाह्यभेदाः च।

**टिप्पणी**–

**अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम्।**
**बालमूकादिवि ज्ञानसदृश शुद्ध वस्तुजम्।।**
**ततः परं पुनर्वस्तु ज्ञानसदृश शुद्ध वस्तुजम्।।**
**ततः परं पुनर्वस्तु धर्मेर्जात्याभिर्यया।**
**बुद्धध्यावसीयते साऽपि प्रत्यक्षत्वेन सम्मता।।**

**निर्विकल्पकबोधोऽपि द्वयात्मकस्यापि वस्तुनः।**
**ग्रहणं लक्षणाख्येयं ज्ञात्रा शुद्धं तु गृह्यते।**

*(श्लोक वार्तिक १/८)*

## सांख्यतत्त्वकौमुदी–

एकादशमिन्द्रियमाह–उभयात्मकमिति। अत्र एकादशस्विन्द्रियेषु मध्ये मन उभयात्मकम्, बुद्धीन्द्रियं कर्मेन्द्रियं च, चक्षुरादीनां वागादीनां च मनोऽधिष्ठितानामेव स्वस्वविषयेषु प्रवृत्तेः। तदसाधारणेन रूपेण लक्ष्यति–"सङ्कल्पकमत्र मन" इति। सङ्कल्पेन रूपेण मनो लक्ष्यते। आलोचितमिन्द्रियेण वस्तु 'इदम्' इति। सम्मुग्धम् 'इदमेवं नैवम्' इति सम्यगवकल्पयति-विशेषणविशेष्यभावेन विवेचयतीति यावत्। यदाहुः–'सम्मुग्धं वस्तुमात्रं तु प्राग्गृह्णन्त्यविकल्पितम्। तत् सामान्यविशेषाभ्यां कल्पयन्ति मनीषिणः।' इति।। तथाहि 'अस्ति ह्यालोचनज्ञानं प्रथमं निर्विकल्पकम्। बालमूकादिविज्ञानसदृशं मुग्धवस्तु जम्।। ततः परं पुनर्वस्तु धर्मेर्जात्यादिभिर्यया। बुद्धयाऽवसीयते सापि प्रत्यक्षत्वेनसम्मता (श्लो०वा०प्रत्यक्षसूत्रम् ११२, १२०)।। सोऽयं सङ्कल्पलक्षणो व्यापारो मनसः समानासमानजातीयाभ्यां व्यवच्छिन्दन् मनो लक्षयति।

NOTES

स्यादेतत्–असाधारणव्यापारयोगिनौ यथा महदहङ्कारी नेन्द्रियम् एव मनोऽप्यसाधारणव्यापारयोगि नेन्द्रियं भवितुमर्हतीत्यत आह–''इन्द्रियं च'' इति। कुत:? ''साधर्म्यात्''। इन्द्रियान्तरै: सात्त्विकाहङ्कारोपादानत्वं च साधर्म्यं न त्विन्द्रलिङ्गत्वम्, महदहङ्करयोरप्यात्मलिङ्गात्वेन्द्रियत्वप्रसङ्गात्। तस्माद् व्युत्पत्तिमात्रमिन्द्रलिङ्गत्वम्, न तु प्रवृत्तिनिमित्तम्।

अथ कथ सात्त्विकाहङ्कारादेक स्मादेकादशेन्द्रियाणीत्यत आह–'गुणपरिणामविशेषान्नात्वं बाह्यभेदाश्च' इति। शब्दाद्युपभोगसम्प्रवर्त-कादृष्टसहकारिभेदात्कार्यभेद:। अदृष्टभेदोऽपि गुणपरिणाम एव 'ब्राह्यभेदाश्च' इति दृष्टान्तार्थम्, यथा बाह्यभेदास्तथैतदपीत्यर्थ:।। २७।।

## ( २८ )

**रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्ति:।**
**वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्।। २८।।**

**अन्वय**–रूपादिषु आलोचनमात्रम् पञ्चानाम् (ज्ञानेन्द्रियाणाम्) वृत्ति: इष्यते। वचनदानविहरणोत्सर्गानन्दा: च पञ्चानाम् कर्मेन्द्रियाणाम् (वृत्ति: इष्यते)।

## सांख्यतत्त्वकौमुदी–

बुद्धीन्द्रियाणां सम्मुग्धवस्तुदर्शनमालोचनमुक्तम्। ''वचनादानविहरणोत्सर्गा-नन्दाश्च पञ्चानाम्'' कर्मेन्द्रियाणाम्। कण्ठताल्वादिस्थानमिन्द्रियं वाक्, तस्या वृत्तिर्व्यापार: वचनम्, ज्ञानेन्द्रियाणां वृत्तय: स्पष्टा:।। २९।।

## ( २९ )

**स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामामान्या।**
**सामान्यकरणवृत्ति: प्राणाद्या: वायव: पञ्च।। २९।।**

**अन्वय**–त्रयस्य स्वालक्षण्यं वृत्ति: सा एषा असामान्या प्राणाद्या: भवति, सामान्यकरणवृत्ति: पञ्च वायव: (सन्ति)।

## सांख्यतत्त्वकौमुदी–

अन्त: करणत्रयस्य वृत्तिमाह–''स्वालक्षण्यम्'' इति। स्वालक्षण्यं वृत्तिस्त्रयस्य। स्वमसाधारणं लक्षणं येषां तानि स्वलक्षणानि महदहङ्कारमनांसि, तेषां भाव:

स्वालक्षण्यम्, तच्च स्वानि-स्वानि लक्षणान्येव। तद्यथा–महतोऽध्यवसाय:, अहङ्कारस्याभिमान:, संकल्पो मनसो वृत्तिः व्यापार:।

वृत्तिद्वैविध्यं साधारणासाधारणत्वाभ्यामाह–''सैषा भवत्यसामान्या'' असाधारणी। ''सामान्यकरणवृत्तिः प्राणाद्या वायव: पञ्च।'' सामान्या चासौ करणवृत्तिश्चेति त्रयाणामपि करणानां पञ्च वायवो जीवनं वृत्तिः, तद्भावे भावात्, तदभावे चाभावात्। तत्र 'प्राणो' नासाग्रहन्नाभिपादाङ्गुष्ठवृत्तिः, 'अपान:' कुकाटिकापृष्ठनपादपायूपस्थपार्श्ववृत्तिः, 'समाना' हृन्नाभिसर्वसन्धिवृत्तिः, 'उदानो' हृत्कण्ठतालुमूर्धभ्रूमध्यवृत्ति, 'व्यान' स्त्वग्वृत्तिरिति पञ्च वायव:।। २९।।

## ( ३० )

**युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा।**
**दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः॥ ३०॥**

**अन्वय**–दृष्टे तस्य चतुष्टयस्य (करणचतुष्टयस्य) वृत्तिः तु युगपत् क्रमश: च निर्दिष्टा तथापि (युगपत् क्रमश: च) अदृष्टे त्रयस्य अन्त: करणस्य वृत्तिः तत्पूर्विका (निर्दिष्टा)।

## सांख्यतत्त्वकौमुदी–

चतुर्विधकरणस्यासाधारणीषु वृत्तिषु क्रमाक्रमौ सप्रकारावाह–''युगपत्'' इति। दृष्टे, युगपत् यथा सदा सन्तमसान्धकारे विद्युत्सम्पातमात्राद् व्याघ्रमभिमुखमतिसन्निहितं पश्यति, तदा खल्वस्यालोचनसकल्पाभिमानाध्वसाया: युगपदेव प्रादुर्भवन्ति यतस्तत उत्प्लुत्य तत्स्थानादेकपदेऽपसरति।

''क्रमशश्च'', यदा मन्दालोके प्रथमम् तावद्वस्तुमात्रं सम्मुग्धमालोचयति, अथ प्रणिहितमना: कर्णान्ताकृष्टसशरशिञ्जितमण्डलीकृतकोदण्ड: प्रचण्डतर: पाटच्चरोऽयम्, इति निश्चिनोति, अथ च 'मां प्रत्येति' इत्यभिमन्यते, अथाध्यवस्यति–अपसरामीत: स्थानात् इति।

परोक्षे त्वन्त:करणत्रयस्य बाहेन्द्रियवर्जं वृत्तिरित्याह–'अदृष्टे त्रयस्य तत्पूर्विका वृत्तिः' इति। अन्त:करणत्रयस्य युगपत्क्रमेण च वृत्तिर्दृष्टपूर्विकेति। अनुमानागमस्मृतयो हि परोक्षेऽर्थे दर्शनपूर्वा: प्रवर्तन्ते, नान्यथा। यथा दृष्टे तथाऽदृष्टेऽपीति योजना।। ३०।।

NOTES

NOTES

## ( ३१ )

**स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिम्।**
**पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम्॥ ३१॥**

**अन्वय**–(करणानि) स्वां स्वां परस्पराकूतहेतुकां वृत्तिम् प्रतिपद्यन्ते (अत्र) पुरुषार्थः एव हेतुः अस्ति करणम् केनचित् न कार्यते।

### सांख्यतत्त्वकौमुदी–

स्यादेतत्–चतुर्णां त्रयाणां वा वृत्तयो न तावत्तन्मात्राधीनास्तेषां सदातनत्वेन वृत्तीनां सदोत्पादप्रसङ्गात्, आकस्मिकत्वे तु वृत्तिसङ्करप्रसङ्गो नियमहेतोर-भावादित्यत आह–''स्वाम्'' इति।

करणानीति शेषः। यथा हि बहवः पुरुषा शाक्तीकयाष्टीकधानुष्ककार्पाणिकाः कृतसंकेताः परावस्कन्दनाय प्रवृत्ताः, तत्रान्यतमस्याकूतमवगम्यान्यतमः प्रवर्तते, प्रवर्तमानस्तु शाक्तीकः शक्तिमेवादत्ते, न तु युष्ट्यादिकम्, एवं याष्टीकोऽपि यष्टिमेव, न शक्त्यादिकम्। तथान्यतमस्य करणस्याकूतात् स्वकार्यकरणाभि-मुख्यादन्यतमै करणं प्रवर्तते। तत्प्रवृत्तश्च हेतुमत्त्वान्न वृत्तिसङ्करप्रसङ्ग इत्युक्तम्–''स्वां स्वां प्रतिपद्यन्ते'' इति।

**स्यादेतत्**–याष्टीकादयश्चेतनत्वात् परस्पराकूतमवगम्य प्रवर्तन्त इति युक्तम्। करणानि त्वचेतनानि, तस्मान्नैवं प्रवर्तितुमुत्सहन्ते। तेनैषामधिष्ठात्रा करणानां स्वरुपसामर्थ्योपयोगाभिज्ञन भवितव्यमित्यत आह–''पुरुषार्थ एव हेतुः, न केनचित्कार्यते करणम्'' इति। भोगापवर्गलक्षणः पुरुषार्थ एवानागतावस्थः प्रवर्तयति करणानि, कृतमत्र तत्स्वरूपाभिज्ञेन कर्त्रा। एतच्च 'वत्सविवृद्धिनिमित्तम्' (का० ५७) इत्यत्रोपपादयिष्यते।। ३१।।

## ( ३२ )

**करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्।**
**कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यं च॥ ३२॥**

**अन्वय**–करणं त्रयोदशविधम् तत् (करणं पुनः) आहरणधारणप्रकाशकरम् (अस्ति) तस्य च आहार्यं धार्यं प्रकाश्यं च कार्यं दशधा (भवति)।

### सांख्यतत्त्वकौमुदी–

''न केनचित् कार्यते करणम्'' इत्युक्तम्। तत्र करणं विभजते–''करणं

त्रयोदशविधम्'' इति। इन्द्रियाण्येकादश, बुद्धिरहङ्कारश्चेति त्रयोदशप्रकारं करणम्। कारकविशेषः करणम्, न च व्यापारवेशं विना कारकत्वमिति व्यापारावेशमाह–''तदाहरणधारणप्रकाशकरम्'' यथायथम्। तत्र कर्मेन्द्रियाणि वागादीन्याहरन्ति यथास्वमुपाददते स्वव्यापारेण व्याप्नुवन्तीति यावत्। बुद्ध्यहङ्कारमनांसि तु स्ववृत्या प्राणादिलक्षणया धारयन्ति। बुद्धीन्द्रियाणि च प्रकाशयन्ति।

आहरणधारणादिक्रियाणां सकर्मकततया किं कर्म कतिविधिं चेत्यत आह–'कार्य च तस्य' इति। कार्य तस्य त्रयोदशविधस्य करणस्य दशधा, आहार्य धार्यं प्रकाश्यं च। आहार्य व्याप्यम्। कर्मेन्द्रियाणां वचनादान-विहरणोत्सर्गानन्दाः यथायथं व्याप्याः, ते च यथायथं दिव्यादिव्यतया दशैत्याहार्य दशधा। एवं धार्यमप्यन्तः करणत्रयस्य प्राणादिलक्षणया वृत्या शरीरम्, तच्च पार्थिवादि पाञ्चभौतिकम्। शब्दादीनां पञ्चानां समूहः पृथिवी, ते च पञ्च दिव्यादिव्यतया दशेति धार्यमपि दशधा। एवं बुद्धीन्द्रियाणां शब्दस्पर्शरूपरसगन्धा यथायथं व्याप्याः, ते च यथायथं दिव्यादिव्यतया दशेति प्रकाश्यमपि दशधेति।

## ( ३३ )

**अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्।**
**साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम्॥ ३३॥**

**अन्वय–**अन्तःकरणम् त्रिविधिम्, त्रयस्य विषयाख्यम् बाह्यम् दशधा बाह्यम् (करणम्) साम्प्रतकालम् अभ्यन्तरम् करणं त्रिकालम्।

## सांख्यतत्त्वकौमुदी–

त्रयोदशविधकरणेऽवान्तरविभागं करोतिः–''अन्तःकरणम्'' इति। अन्तः करणं त्रिविधम्–''बुद्धिरहंकारो मनः'' इति, शरीराभ्यन्तरवर्तित्वादन्तःकरणम्। ''दशधा बाह्य''–करणं, ''त्रयस्य''–अन्तः करणस्य ''विषयाख्यम्'' विषयमाख्याति विषयसंकल्पाभिमानाध्यवसायेषु कर्तव्येषु द्वारीभवति। तत्र बुद्धीन्द्रियाण्यालोचनेन, कर्मेन्द्रियाणि तु यथास्वं व्यापारेण।

बाह्यान्तरयोः करणयोर्विशेषान्तरम् आह–''साम्प्रतकालम्'' इति। वर्तमानकालं बाह्यमिन्द्रियम्। वर्तमानसमीपमनागतमतीतमपि वर्तमानम्, अतो वागपि वर्तमान-कालविषया भवति। ''त्रिकालमाभ्यन्तरं करणम्'' इति। तद्यथा–नदीपूरभेदादभूद् वृष्टिः, अस्ति धूमादग्निरिह नगनिकुञ्जे, असत्युतघातके पिपीलिकाण्डसञ्चरणाद्-भविष्यति, वृष्टिरिति, तदनुरूपाश्च सङ्कल्पाभिमानाध्यवसाया भवन्ति।

NOTES

कालश्च वैशेषिकाभिमत एको न अनागतादिव्यवहारभेदं प्रवर्तयितुमर्हति। तस्मादयं यैरुपाधिभेदैरनागतादिभेदं प्रतिपद्यते, सन्तु तु एवोपाधयः येऽनागतादिव्यवहारहेतवः, कृतमत्रान्तर्गडुना कालेनेति सांख्याचार्याः। तस्मान्न कालरूपतत्त्वान्तराभ्युपगम् इति।

## ( ३४ )

**बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि।**
**वाग् भवति शब्दविषया शेषाणि तु पञ्चविषयाणि॥ ३४॥**

**अन्वय**–तेषां (दशानां बाह्यकरणानां मध्ये) पञ्च बुद्धीन्द्रियाणि विशेषाविशेषविषयाणि, वाक् शब्दविषया भवति, शेषाणि तु पञ्चविषयाणि (भवति)।

## सांख्यतत्त्वकौमुदी–

साम्प्रतकालानां बाह्येन्द्रियाणां विषयं विवेचयति–'बुद्धीन्द्रियाणि इति ''बुद्धीन्द्रियाणि तेषां'' दशानामिन्द्रियाणां मध्ये' ''पञ्च'' 'विशेषविशेषविषयाणि।' 'विशेषाः स्थूलाः शब्दादयः शान्तघोरमूढरूपाः, पृथिव्यादिरूपाः, अविशेषास्तन्मात्राणि सूक्ष्माः शब्दादयः। मात्रग्रहणेन स्थूलभूतमपाकरोति। विशेषाश्च अविशेषाश्च विशेषाविशेषाः, त एव विषया येषां बुद्धीन्द्रियाणां तानि तथोक्तानि। तत्रोर्ध्वस्रोतसां योगिनाञ्च श्रोत्रं शब्दतन्मात्रविषयं स्थूलशब्दविषयं च, अस्मदादीनां तु स्थूलशब्दविषयमेव। एवं तेषां त्वक् स्थूलसूक्ष्मस्पर्शविषया, अस्मदादीनां तु स्थूलस्पर्शविषयैव। एवञ्चक्षुरादयोऽपि तेषामस्मदादीनां च रूपादिषु सूक्ष्मस्थूलेषु द्रष्टव्याः। एवं कर्मेन्द्रियेषु मध्ये ''वाग्भवति शब्दविषया''' स्थूलशब्दविषया, तद्धेतुत्वात्। न तु शब्दतन्मात्रस्य हेतुस्तस्याहंकारिकत्वेन वागिन्द्रियेण सहैककारणकत्वात्। शेषाणि तु चत्वारि पायूपस्थपाणिपादाख्यानि पञ्चविषयाणि पाण्याद्याहार्याणां, घटदीनां पञ्चशब्दाद्यात्मकत्वादिति।। ३४।।

❖❖❖

# UNIT–II

# इकाई–द्वितीय

# सांख्यकारिका–२

## ( ३५ )

**सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्।**
**तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि।। ३५।।**

**अन्वय**–यस्मात् सान्तःकरणा बुद्धिः सर्वम् विषयम् अवगाहते तस्मात् त्रिविधं करणं द्वारि, शेषाणि (बाह्यकरणानि) द्वाराणि।

### सांख्यतत्त्वकौमुदी–

साम्प्रतं त्रयोदशसु करणेषु कषाञ्चिद् गुणभावं केषाञ्चित्प्रधानभावं सहेतुकमाह–सान्तःकरणा'' इति। द्वारि'' प्रधानम्। ''शेषाणि'' करणानि बाह्येन्द्रियाणि द्वाराणि नीतं सर्वं विषयं समनोऽहङ्कारा बुद्धिः यस्मादवगाहतेध्यवस्यति, तस्माद् बाह्येन्द्रियाणि द्वाराणि, द्वारवती च सान्तःकरणा बुद्धिरिति।। ३५।।

## ( ३६ )

**एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः।**
**कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति।। ३६।।**

**अन्वय**–प्रदीपकल्पाः परस्परविलक्षणाः एते गुणविशेषाः पुरुषस्य कृत्स्नम् अर्थम् प्रकाश्य बुद्धौ प्रयच्छन्ति।

### सांख्यतत्त्वकौमुदी–

न केवलं बाह्येन्द्रियाण्यपेक्ष्य प्रधानं बुद्धिः, अपि तु ये अप्यहङ्कारमनसी द्वारिणी ते अप्यपेक्ष्य बुद्धिः प्रधानमित्याह–''एते'' इति। यथा हि ग्रामाध्यक्षः कौटुम्बिकेभ्यः करमादाय विषयाध्यक्षाय प्रयच्छति, विषयाध्यक्षश्च सर्वाध्यक्षाय,

NOTES

स च भूपतये, तथा बाह्येन्द्रियाण्यालोच्य मनसे समर्पयन्ति, मनश्च संकल्प्याहङ्काराय, अहङ्कारश्चाभिमत्य बुद्धौ सर्वाध्यक्षभूतायाम्। तदिदमुक्तम् ''पुरुषार्थं प्रकाश्च बुद्धौ प्रयच्छन्ति'' इति। बाह्येन्द्रियमनोऽहङ्काराश्च गुणविशेषाः' गुणानां सत्तवरजस्मसां विकाराः, ते तु परस्परविरोधशीला अपि पुरुषार्थेन भोगापवर्गरूपेणैकवाक्यतां नीताः, यथा वर्तितैलवह्नयः सन्तमसापनयेन रूपप्रकाशाय मिलितः प्रदीपः, एवमेते गुणविशेषाः इति योजना।

## ( ३७ )

**सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः।**
**सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम्॥ ३७॥**

**अन्वय**—यस्मात् पुरुषस्य सर्वं (विषयं) प्रति (जायमानम्) उपभोगम् बुद्धिः साधयति सा एव च पुनः सूक्ष्मम् प्रधान पुरुषान्तरम् विशिनष्टि। (तस्मात् उक्तवैशिष्ट्येन सर्वाणि करणानि विषयम् प्रकाश्य बुद्धौ प्रयच्छन्ति।)

## सांख्यतत्त्वकौमुदी—

कस्तात्पुनर्बुद्धौ प्रयच्छन्ति, न तु बुद्धिरहङ्काराय द्वारिणे मनसे चेत्यत आह—सर्वमिति। पुरुषार्थस्य प्रयोजकत्वात् तस्य यत्साक्षात्साधनं तत्प्रधानम्। बुद्धिश्चास्य साक्षात्साधनं, तस्मात्सैव प्रधानम्। यथा सर्वाध्यक्षः साक्षाद्राजार्थसाधनतया प्रधानम्, इतरे तु ग्रामाध्यक्षादयस्तम्प्रति गुणभूताः। बुद्धिर्हिपुरुषसन्निधानात् तच्छायापत्त्या तद्रूपेण सर्वविषयोपभोगं पुरुषस्य साधयति। सुखदुःखानुभवो हि भोगः स च बुद्धौ, बुद्धिश्च पुरुषरूपेवेति सा च पुरुषमुपभोजयति। यथार्थालोचनसङ्कल्पाभिमानाश्च तत्तद्रूपपरिणामेन बुद्धावुपसङ्क्रान्ताः यथेन्द्रियव्यापारा अपि बुद्धेरेव स्वव्यापारेणाध्यवसायेन सहैकव्यापारीभवन्ति, यथा स्वसैन्येन सह ग्रामाध्यक्षादिसैन्यं सर्वाध्यक्षस्य भवति। ''सर्वं शब्दादिकं ''प्रति'' यः उपभोगः 'पुरुषस्य', तं साधयति।

ननु पुरुषस्य सर्वविषयोपभोगसम्पादिका यदि बुद्धिः, तर्ह्यनिर्मोक्ष इत्यत आह— ''सैव च'' इति। ''पुनः'' पश्चात् ''प्रधानपुरुषयोरन्तरं'' विशेषं ''विशिनष्टि'' करोति, यथौदनपाकं पचतीति, करणं च प्रतिपादनम्। ननु प्रधानपुरुषयोरन्तरस्य कृतकत्वादनित्यत्वं तत्कृतस्य मोक्षस्य स्यादित्यत आह— ''विशिनष्टि'' प्रधानं सविकारमन्यदहमन्यः इति विद्यमानमेवान्तरमविवेकेना-विद्यमानमिव बुद्धिर्बोधयति, न तु करोति', येनानित्यत्वमित्यर्थः अनेनापवर्गः पुरुषार्थो दर्शितः, ''सूक्ष्मम्'' दुर्लक्ष्यं तदन्तरमित्यर्थः॥ ३७॥

NOTES

## ( ३८ )

**तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः।**
**एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च॥ ३८॥**

**अन्वय**–तन्मात्राणि अविशेषाः तेभ्यः पञ्चभ्यः (तन्मात्रेभ्यः) पञ्च भूतानि (संभवन्ति), एते विशेषाः स्मृताः, च (यतः) शान्ताः घोराः मूढाः च (अस्ति)।

### सांख्यतत्त्वकौमुदी–

तदेवं करणानि विभज्य विशेषाविशेषान् विभजते–तन्मात्राणीति। शब्दादितन्मात्राणि सूक्ष्माणि। न चैषां शान्तत्वादिरस्ति उपभोगयोग्यो विशेष इति मात्रशब्दार्थः। अविशेषानुक्त्वा विशेषान्वक्तुमुत्पत्तिमेषामाह–''तेभ्यो भूतानि'' इति। तेभ्यस्तन्मात्रेभ्यो यथासंख्यमेकद्वित्रिचतुष्पञ्चभ्यो भूतानि आकाशानिलानल-सलिलावनिरूपाणि पञ्च पञ्चभ्यस्तन्मात्रेभ्यः।

अस्त्वेषां भूतानामुत्पत्तिः, विशेषत्वे किमायातमित्यत आह–''एते स्मृता विशेषाः'' इति कुतः? शान्ता घोराश्च मूढाश्च'। चकार एको हेतौ, द्वितीयः समुच्चये। यस्मादाकाशादिषु स्थूलेषु सत्त्वप्रधानतया केचिच्छान्ताः सुखाः प्रकाशा लघवः, केचिद्रजः प्रधानतया घोरा दुःखा अनवस्थिताः, केचित्तमः प्रधानतया मूढा विषण्णा गुरवः। तेऽमी परस्परव्यावृत्त्यानुभूयमाना 'विशेषा' इति च 'स्थूला' इति चोच्यन्ते। तन्मात्राणि तु अस्मदादिभिः परस्परव्यावृत्तानि नानुभूयन्ते इति अधिशेषा इति सूक्ष्मा इति चोच्यन्ते।। ३९।।

## ( ३९ )

**सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः।**
**सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते॥ ३९॥**

**अन्वय**–(एते) विशेषाः सूक्ष्माः मातापितृजाः प्रभूतैः सह (इति) त्रिधाः स्युः, तेषाम् (त्रयाणां मध्ये) सूक्ष्माः नियताः, मातापितृजाः (च) निवर्तन्ते।

### सांख्यतत्त्वकौमुदी–

''सूक्ष्मा'' इति ''त्रिधा विशेषाः स्युः'' इति। तान् विशेषप्रकारानाह–''सूक्ष्माः सूक्ष्मदेहाः परिकल्पिताः ''मातापितृजाः'' षाट्कौशिकाः। तत्र मातृतो लोमलोहितमांसानि, पितृवस्तु स्नाय्वस्थिमज्जान इति षट् कोषाः। प्रकृष्टानि

NOTES

महान्ति भूतानि प्रभूतानि, तैस्सह। सूक्ष्मं शरीरमेको विशेषः, मातापितृजो द्वितीयः, महाभूतानि तृतीयः, महाभूतवर्गे च घटादीनां निवेश इति।

सूक्ष्ममातापितृजयोर्देहयोविशेषमाह—''सूक्ष्मास्तेषाम्'' विशेषाणां मध्ये ये ते ''नियताः'' नित्याः, ''मातापितृजा निवर्तन्ते'' इति। रसान्ता वा भस्मान्ता वा विडन्ता वेति।। ३९।।

## ( ४० )

**पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्।**
**संसरति निरूपभोगं भावैरधिवासितं लिङ्गम्।। ४०।।**

**अन्वय**—पूर्वोत्पन्नम् असक्तं नियतम् महदादिसूक्ष्मपर्यन्तम् निरूपभोगम् भावैः अधिवासितम् लिङ्गम् संसरति।। ४०।।

## सांख्यतत्त्वकौमुदी—

सूक्ष्मशरीरं विभजते—'पूर्वोत्पन्नम्' इति। ''पूर्वोत्पन्नम्'' प्रधानेनादिसर्गे प्रतिपुरुषमेकैकमुत्पादितम्। ''असक्तम्'' अव्याहतं—शिलामप्यनुविशति। ''नियतम्'' आ चादिसर्गात्, आ च महाप्रलयादवतिष्ठते। ''महदादिसूक्ष्मपर्यन्तम्'' महदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्यन्तम्। एषां समुदायः सूक्ष्मं शरीरम्, शान्तघोरमूढैरिन्द्रियैरन्वितत्वाद्विशेषः।

नन्वस्त्वेतदेव शरीरं भोगायतनं पुरुषस्य, कृतं दृश्यमानेन षाट्कौशिकेन शरीरेणेत्यत आह—'संसरति' इति। उपात्तमुपात्तं षाट्कौशिकं शरीरं जहाति, हायं हायं चोपादत्ते। कस्मात्? ''निरूपभोगं'' यत्ः, षाट्कौशिकं शरीरं विना निरुपभोगं यस्मात्, तस्मात्सूक्ष्मं शरीरं संसरति।

ननु धर्माधर्मनिमित्तः संसारः, न च सूक्ष्मशरीरस्यास्ति तद्योगः तत्कथं संसरतीत्यत आह ''भावैरधिवासितम्'' इति। धर्माधर्मज्ञानाज्ञानवैराग्या-वैराग्यैश्वर्यानैश्वर्याणि भावाः, तदन्विता बुद्धिः, तदन्वितञ्च सूक्ष्मं शरीरमिति तदपि भावैरधिवासितम्, यथा सुरभिचम्पककुसुमसम्पर्काद्वस्त्रं तदामोदवासितम्भवति। तस्माद्भावैरेवाधिवासितत्वात् संसरति। कस्मात् पुनः प्रधानमिव महाप्रलयेऽपि तच्छरीरं न तिष्ठतीत्यत आह—''लिङ्म्'' इति। लयं गच्छनीति लिङ्गम् हेतुमत्त्वेन चास्य लिङ्त्वमिति भावः।। ४०।।

NOTES

## ( ४१ )

**चित्रं यथाऽऽश्रयमृते स्थाण्वादिभ्यो विना यथाच्छाया।**
**तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्‌गम्॥ ४१॥**

**अन्वय**–यथा आश्रयम् ऋते चित्रम्, यथा स्थाण्वादिभ्यः विना छाया (च) न तिष्ठति, तदवत् अविशेषैः विना लिङ्‌गम् निराश्रयम् न तिष्ठति।

## सांख्यतत्त्वकौमुदी–

स्यादेतत्–बुद्धिरेव साहकारेन्द्रिया कस्मान्न संसरति? कृतं सूक्ष्मशरीरेणा-प्रामाणिकेनेत्यत आह–''चित्रम्'' इति । लिङ्‌गनात् ज्ञापनात् बुद्ध्यादयो 'लिङ्‌गम्', तत् अनाश्रयं न तिष्ठति जन्मप्रायणान्तराले बुद्ध्यादयः प्रत्युत्पन्नशरीराश्रितः, प्रत्युत्पन्नतन्मात्रवत्त्वे सति बुद्ध्यादित्वात्, दृश्यमानशरीरवृत्ति-बुद्ध्यादिवत्, ''विना विशेषैः'' इति, सूक्ष्मैः शरीरैरित्यर्थः। आगमश्चात्र भवति–''ततः सत्यवतः कायात् पाशबद्धं वशंगतम्। अंगुष्ठमात्रं पुरुषं निश्चकर्ष बलाद्यमः।'' (महाभारत, वन० अ० २८६) इत्यंगुष्ठामात्रत्वेन सूक्ष्मशरीरत्वमुपलक्षयति। आत्मनो निष्कर्षासम्भवात् सूक्ष्ममेव शरीरं ''पुरुषंः'', तदपि पुरि स्थूलशरीरे शेते इति।। ४१

## ( ४२ )

**पुरुषार्थहेतुकमिदं मिमित्तनैमित्तिकप्रसङ्‌गेन।**
**प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिङ्‌गम्॥ ४२॥**

**अन्वय**–इदम् पुरुषार्थहेतुकम् लिङ्‌गम् निमित्तनैमित्तिकप्रसङ्‌गेन प्रकृतेः विभुत्वयोगात् नटवत् व्यवस्थिते।

## सांख्यतत्त्वकौमुदी–

एवं सूक्ष्मशरीरास्तित्वमुपपाद्य यथा संसरति, येन हेतुना च, तदुभयमाह–''पुरुषार्थहेतुकम्'' इति पुरुषार्थेन हेतुना प्रयुक्तम्। ''निमित्तम्'' धर्माधर्मादि, ''नैमित्तिकम्'' तेषु निकायेषु यथायथं षाट्कौशिकशरीरग्रहः, स हि धर्मादिनिमित्तप्रभवः। निमित्तञ्च नैमित्तिकञ्च, तत्र यः प्रसंग प्रसक्तिस्तया ''नटवद् व्यवतिष्ठते लिङ्‌गम्'' सूक्ष्मशरीरम्। यथा हि नटस्तां तां भूमिकां विधाय परशुरामो वाऽजातशत्रुर्वा वत्सराजो वा भवति, एवं तत्तत्स्थूलशरीर-परिग्रहणाद्देवो वा मनुष्यो वा पशुर्वा वनस्पतिर्वा भवति सूक्ष्मशरीरमित्यर्थः।

NOTES

कुतस्त्यः पुनरस्येद्दृशो महिमेत्यत आह–'प्रकृतेर्विभुत्वयोगात्' इति। यथा च पुराणाम्–'वैश्वरूप्यात् प्रधानस्य परिणामोऽयमद्भुतः' इति।। ४२।।

## ( ४३ )

**सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च धर्माद्याः।**
**दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः।। ४३।।**

**अन्वय**–सांसिद्धिकाः प्राकृतिकाः च वैकृताः च धर्माद्याः भावाः करणाश्रयिणः दृष्टाः कललाद्या (भावाः) कार्याश्रयिणः (दृष्टाः)।

## सांख्यतत्त्वकौमुदी–

''निमित्तनैमित्तिकप्रसंगेन'' इत्युक्तम्। तत्र निमित्तनैमित्तिके विभजते–'सांसिद्धिकाश्च' इति। 'वैकृताः' नैमित्तिकाः पुरुषस्य जातस्योत्तरकालदेवताराधना-दिनोत्पन्नाः। ''प्राकृतिकाः'' स्वाभाविका भावाः सांसिद्धिकाः। तथा हि–सर्गादावादिविद्वान् अत्रभवान् कपिलोमहामुनिर्धर्मज्ञानवैराग्यैश्वर्यसम्पन्नः प्रादुर्बभूवेति स्मरन्ति। वैकृताश्च भावा असांसिद्धिकाः, ये उपायानुष्ठानेनोत्पन्नाः यथा प्राचेतसप्रभृतीनां महर्षीणाम्। एवमधर्माज्ञानावैराग्यानैश्वर्याण्यापि। एते कुत्र दृष्टाः? इत्यत आह–करणाश्रयिण इति। करणं बुद्धितत्त्वम्। कार्यं शरीरं तदाश्रयिणः, तस्यावस्थाः कललबुद्बुदमांसपेशीकरण्डाद्यंगप्रत्यंगव्यूहाः गर्भस्थस्य, ततो निर्गतस्य बालस्य बाल्यकौमारयौवनवार्धकानीति।। ४३।।

## ( ४४ )

**धर्मेण गगनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण।**
**ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः।। ४४।।**

**अन्वय**–धर्मेण ऊर्ध्वम् गमनं भवति, अधर्मेण अधस्तात् गमनं (भवति), ज्ञानेन च अपवर्गः इष्यते विपर्ययात् बन्धः इष्यते।

## सांख्यतत्त्वकौमुदी–

अवगतानि निमित्तनैमित्तिककानि। कतमस्य तु निमित्तस्य कतमन्नैमित्ति-कमित्यत आह–''धर्मेण गमनमूर्ध्वम्'' द्युप्रभृतिषु लोकेषु। ''गमनमधस्ताद्भवत्य-धर्मेण'' सुतलादिषु लोकेषु। ''ज्ञानेन चापवर्गः''। तावदेव प्रकृतिर्भोगमारभते न यावद्विवेकख्याति करोति। अथ विवेकख्यातौ सत्यां कृतकृत्यतया विवेकख्यातिमन्तं पुरुषं प्रतिनिवर्तते, यथाहुः–''विवेकख्यातिपर्यन्तं ज्ञेयं प्रकृतिचेष्टितम्'' इति।

NOTES

''विपर्ययात्'' अतत्त्वज्ञानात् ''इष्यते बन्धः''। स च त्रिविधः–प्राकृतिको वैकृतिको दाक्षिणिकश्चेति। तत्र प्रकृतावात्मज्ञानाद् ये प्रकृतिमुपासते तेषां प्राकृतिको बन्धः, यः पुराणे प्रकृतिलयान् प्रत्युच्यते–''पूर्णं शतसहस्रं हि तिष्ठन्त्यव्यक्तचिन्तकाः'' इति। वैकारिको बन्धस्तेषां ये विकारानेव भूतेन्द्रियाहंकारबुद्धीः पुरुषधियोपास्ते, तान् प्रतीदमुच्यते–''दश मन्वन्तराणीह तिष्ठन्तोन्द्रियचिन्तकाः। भौतिकास्तु शतं पूर्णं, सहस्त्र त्वाभिमानिकाः।। बौद्धा दश सहस्त्राणि तिष्ठन्ति विगतज्वराः।'' ''ते खल्वमी विदेहा येषां वैकृतिको बन्धः'' इति इष्टापूर्तेन दाक्षिणिकः। पुरुषतत्वानभिज्ञो हीष्टापूर्तकारी कामोपहतमना बध्यते इति।। ४४।।

## ( ४५ )

**वैराग्यात् प्रकृतिलयः संसारो भवति राजसाद् रागात्।**
**ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः।। ४५।।**

**अन्वय**–वैराग्यात् प्रकृतिलयः भवति, राजसात् रागात् संसारः (भवति), ऐश्वर्यात् अविघातः (भवति), विपर्ययात् तद्विपर्यासः (च भवति)।

## सांख्यतत्त्वकौमुदी–

''वैराग्यात्'' प्रकृतिलयः'' इति। पुरुषतत्वानभिज्ञस्य वैराग्यमात्रात् प्रकृतिलयः, प्रकृतिग्रहणेन प्रकृतिमहदहङ्कारभूतेन्द्रियाणि गृह्यान्ते, तेष्वात्मबुद्ध्योपास्यमानेषु लयः। कालान्तरेण च पुनराविर्भवति। ''संसारो भवति राजसाद्रागात्'' इति। 'राजसात्' इत्यनेन रजसो दुःखहेतुत्वात् संसारस्य दुःखहेतुता सूचिता। 'ऐश्वर्यादविघातः' इति–इच्छायाः। ईश्वरो हि यदेवेच्छति तदेव करोति। ''विपर्ययात्'' अनैश्वर्यात् ''तद्विपर्यासः'' सर्वत्रेच्छाविघात इत्यर्थः।। ४५।।

## ( ४६ )

**एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः।**
**गुणवैषम्यविमर्दात् तस्य च भेदास्तु पञ्चाशत्।। ४६।।**

**अन्वय**–विपर्ययाशक्तितुष्टिसिद्ध्याख्यः एषः प्रत्ययसर्गः (अस्ति)। गुण-वैषम्यविमर्दात् तस्य तु पञ्चाशत् भेदाः (भवन्ति)।

## सांख्यतत्त्वकौमुदी–

बुद्धिधर्मान् धर्मादीनष्टौ भावान् समासव्यासाभ्यां मुमुक्षूणां हेयोपादेयान्

दर्शयितुं प्रथमं तावत् समासमाह–प्रतीयतेऽनेनेति प्रत्ययो बुद्धिः, तस्य सर्गः। तत्र 'विपर्ययः' अज्ञानमविद्या, सापि बुद्धिधर्मः। अशक्ति'' अपि करणवैकल्य-हेतुका बुद्धिधर्म एवं ''तुष्टिसिद्धी'' अपि वक्ष्यमाणलक्षणे बुद्धिर्मावेव। तत्र विपर्ययाशक्तितुष्टिपु यथायोगं सप्तानां च धर्मादीनां ज्ञानवर्जमन्तर्भावः, सिद्धौ च ज्ञानस्येति।

व्यासमाह–''तस्य च भेदास्तु पञ्चाशत्'' इति। कस्मात्? ''गुणवैषम्य-विमर्दात्'' इति। गुणानां वैषम्यम् एकैकस्याधिकबलता द्वयोर्द्वयोर्वा, ऐकैकस्य न्यूनबलता द्वयोर्द्वयोर्वा, ते च न्यूनाधिक्ये मन्दमध्याधिमात्रतया यथाकार्यमुन्नीयेते। तदिदं गुणानां वैषम्यम्, तेनोपमर्दः, एकैकस्य न्यूनबलस्य द्वयोर्द्वयोर्वाभिभवः। तस्मात्तस्य भेदाः पञ्चाशदिति।

## ( ४७ )

**पञ्च विपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात्।**
**अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः॥ ४७॥**

**अन्वय**–विपर्यभेदा पञ्च भवन्ति, करणवैकल्यात् अशक्तिः च अष्टाविंशति भेदा (भवति), तुष्टिः नवधा (भवति), सिद्धिः अष्टधा (भवति)।

## सांख्यतत्त्वकौमुदी–

तानेव पञ्चाशद् भेदान् गणयति–'पञ्च' इति। अविद्यास्मितारागद्वेषाभिनिवेशा यथासंख्यं तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञकाः पञ्च विपर्ययविशेषाः, विपर्ययप्रभवाणामप्यस्मितादीनां विपर्ययस्वभावत्वात्। यद्वा, यदविद्यया विपर्य ययेणावधार्यते वस्तु, अस्मितादयस्तत्स्वभावाः सन्तस्तदभिनिविशन्ते। अत एव 'पञ्चपर्वाविद्या इत्याह भगवान् वार्षगण्यः॥ ४७॥

## ( ४८ )

**भेदस्तमसोऽष्टविधो मोहस्य च दशाविधो महामोहः।**
**तामिस्रोऽष्टादशधा तथा भवन्त्यन्धतामिस्रः॥ ४८॥**

**अन्वय**–तमसः मोहस्य च अष्टविधः (अस्ति) भेदः दशाविधः माहमोहः (भवति) तामिस्रः अष्टादशधा (अस्ति) तथा (अष्टादशधा) अन्धतामिस्रः भवति।

NOTES

## सांख्यतत्त्वकौमुदी–

सम्प्रति पञ्चाना विपर्ययभेदानामवान्तरभेदमाह–''भेद:'' इति। भेदस्त-मसोऽविद्याया अष्टविध:। अष्टस्वव्यक्तमहदहङ्कारपञ्चतन्मात्रेष्वनात्मस्वात्म-बुद्धिरविद्या तम:, अष्टविधविषयत्वात्तस्याष्टविधत्वम्। ''मोहस्य च'' इति, अत्राप्यष्टविधो भेदश्चकारेणानुषज्यते। देवा ह्यष्टविधमैश्वर्यमासाद्यामृतत्वा-भिमानिनोऽणिमादिकमात्मीय शाश्वतिकमभिमन्यन्ते, सेयमस्मिता मोहोऽष्ट-विधैश्वर्यविषयात्वादष्टविध:। 'दशविधो महामोह:' इति। शब्दादिषु पञ्चसु दिव्यादिव्यतया दशविधेषु विषयेषु राग आसक्तिर्महामोह:, स च दशविधविषयत्वाद्दशविध:। ''तामिस्त्र:'' द्वेष: 'अष्टादशधा' शब्दादयो दश विषया रञ्जनीया: स्वरूपत:, ऐश्वर्यन्त्वणिमादिकं न स्वरूपतो रञ्जनीयम्, किं तु रञ्जनीयशब्दाद्युपाय:, ते च शब्दादय उपस्थिता: परस्परेणोपहन्यमानास्त-दुपायाश्चाणिमादय: स्वरूपेणैव कोपनीया भवन्तीति शब्दादिभिर्दशभि: सहाणिमाद्यष्टकमष्टादशधेति, तद्विषयो द्वेषस्तामिस्त्रोऽष्टादशविषयत्वादष्टादशधेति। ''तथाभवत्यन्धतामिस्त्र:'' अभिनिवेशोऽन्धतामिस्त्र:। तथेत्यनेनाष्टादशधेत्यनुषज्यते। देवा: खल्वणिमादिकमष्टविधमैश्वर्यमासाद्य दश शब्दादीन् भुञ्जाना: शब्दादयो भोग्यास्तदुपायाश्चाणिमादयोऽस्माकमसुरादिभिर्मोपघानिषत' इति बिभ्यति। तदिदं भयमभिनिवेशोऽन्धतामिस्त्रोऽष्टादशविषयत्वादष्टादशधेति। सोऽयं पञ्चविधविकल्पो विपर्ययोऽवान्तरभेदाद् द्वाषष्टिरिति।

### ( ४९ )

**एकादशेन्द्रियवधा: सह बुद्धिवधैरशक्तिरुद्दिष्टा।**
**सप्तदश वधा बुद्धेर्विपर्ययात् तुष्टिसिद्धीनाम्॥ ४९॥**

**अन्वय**–बुद्धिवधै: सह एकादश इन्द्रियवधा: अशक्ति: उद्दिष्टा, तुष्टीसिद्धीनाम् विपर्ययात् बुद्धे: सप्तदश वधा: (भवन्ति)।

## सांख्यतत्त्वकौमुदी–

तदेवं पञ्च विपर्ययभेदानुक्त्वाष्टाविंशतिभेदामशक्मिाह–''एकादश'' इति। इन्द्रियवधस्य ग्रहो बुद्धिवधहेतुत्वेन, न त्वशक्तिभेदपूरणत्वेन। एकादशेन्द्रियवधा:– 'बाधिर्यं कुष्ठिताऽन्धत्वं जडताऽजिघ्रता तथा। मूकता कौण्यपङ्गुत्वे क्लैव्योदा-वर्तमन्दता:।।' यथासङ्ख्यं श्रोत्रादीनामिन्द्रियाणां वधा:। एतावत्येव तु तद्धेतुका बुद्धेरशक्ति: स्वव्यापारे भवति। तथा चैकादशहेतुकत्वादेकदशधाबुद्धेशक्तिरुच्यते। हेतुहेतुमतोरभेदविवक्षया च समानाधिकरण्यम्।

NOTES

तदेवमिन्द्रियवधद्वारेण बुद्धेरशक्तिमुक्त्वा स्वरूपतोऽशक्तीराह–'सह बुद्धिवधैः' इति। कति बुद्धैः स्वरूपतो वधा इत्यत आह–सप्तदश वधा बुद्धेः।'' कुतः? 'विपर्ययात् तुष्टिसिद्धिनाम्।' तुष्टयो नवधोति तद्विपर्ययास्तन्नि- रूपणान्नवधा भवति, एवं सिद्धयोऽष्टाविति तद्विपर्ययास्तन्निरूपणादष्टौ भवन्तीति।। ४८।।

## ( ५० )

**आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः।**
**बाह्य विषयोपरमात् पञ्च च नव तुष्टयोऽभिमताः।। ५०।।**

**अन्वय**–प्रकृत्युपादानकालभाग्याख्याः चतस्रः आध्यात्मिक्यः विषयोपरमात् च पञ्च बाह्याः (इति) नव तुष्टयः अभिमताः।

## सांख्यतत्त्वकौमुदी–

तुष्टिनेवधेत्युक्तम्, ताः परिगणयति–'आध्यात्मिक्य' इति। आध्यात्मिक्यः– 'प्रकृतिव्यतिरिक्त, आत्मास्ति' इति प्रतिपद्य, ततोऽस्य श्रवणमननादिना विवेकसाक्षात्काराय त्वसदुपदेशतुष्टो यो न प्रयतते, तस्याध्यात्मिक-वयक्यश्चतस्रस्तुष्टयो भवन्ति, प्रकृतिव्यतिरिक्तमात्मानमधिकृत्य यस्मात्तास्तुष्ट-यस्तत्मादाध्यात्मिक्यः। कास्ता इत्यत आह–''प्रकृत्युपादानकालभाग्याख्याः,'' प्रकृत्यादिराख्य यासां तास्तथोक्ताः।

तत्र प्रकृत्याख्या तुष्टिर्यथा कस्यचिदुपदेशे–'विवेकसाक्षात्कारो हि प्रकृतिपरिणामभेदस्तञ्च प्रकृतिरेव करोतीति कृतं तद्ध्यानाभ्यासेन, तस्मादेवमेवाऽस्व वत्स'–इति। सेयमुपदेष्टव्यस्य शिष्यस्य या तुष्टिः प्रकृतौ सा तृष्टिः प्रकृत्याख्या अम्भः' उच्यते।

'या तु प्राकृत्यति विवेकख्यातिर्नं सा प्रकृतिमात्राद्भवति, मा भूत्सर्वस्य सर्वदा, तनमात्रस्य सर्वान् प्रत्ययविशेषात्, प्रव्रज्यायास्तु सा भवति, तस्मात् प्रव्रज्यामुपाददीथाः, कृतं ते ध्यानाभ्यासेनाऽऽयुष्मन्'–इति उपदेशे या तुष्टिः सोपादानाख्या 'सलिलम्' उच्यते।

'प्रव्रज्यापि न सद्यो निर्वाणदेति सैव कालपरिपाकमपेक्ष्य सिद्धि ते विधास्यति, अलमुत्तप्ततया तव'–इति उपदेशे या तुष्टिः सा कालाख्या 'ओधः' उच्यते।

'न प्रकृतेर्न कालान्नाप्युपादानाद्विवेकख्यातिः, अपि तु भाग्यादेव। अत एव मदालसापत्यान्यतिबालानि मातुरुपदेशादेव विवेकख्यातिमन्ति मुक्तानि बभूवुः

तस्माद्भाग्यमेव हेतुर्नान्यत्–इति उपदेशे या तुष्टिः, सा भाग्याख्या 'वृष्टिः' उच्यते।

बाह्या दर्शयति। ''बाह्याः'' तुष्टयः' ''विषयोपरमात् पञ्च।'' याः खल्वनात्मनः प्रकृतिमहदहंकारादीनात्मेत्यभिमन्यमानस्य वैराग्ये सति तुष्टयस्ता बाह्याः, आत्मज्ञानाभावे सत्यनात्मानमधिकृत्य प्रवृत्तेरेति ताश्च वैराग्ये सति तुष्टय इति वैराग्यहेतुपञ्चत्वाद्वैराग्याण्यपि पञ्च, तत्पञ्चत्वात् तुष्टयः पञ्चेति। उपरम्यतेऽनेनेत्सुपरमो वैराग्यम्, विषयादुपरमो विषयोपरमः। विषयाः भोग्याः शब्दादयः पञ्च, उपरमा अपि पञ्च। तथा हि–अर्जनरक्षणक्षयभोगहिंसादोष-दर्शनहेतुजन्मानः पञ्चोपरमा भवन्ति। तथा हि–सेवादयो धनार्जनोपायाः, ते च सेवकादीन् दुःखाकुर्वन्ति 'दुप्यद्दुरीश्वरद्वाः स्थदण्डिचण्डार्धचन्द्रजाम्।' वेदनां। भावयन् प्राज्ञः कः सेवास्वनुषज्यते।।'' एवमन्येऽप्यर्जनोपायाः दुःखा इति। विषयोपरमे या तुष्टिः सैषा पारमुच्यते। तथार्जितं धनं राजैहागारिकाग्निजलौघादिभ्यो विनङ् क्ष्यतीति तद्रक्षणे महद् दुःखमिति भावयतो विषयोपरमे या तुष्टिः सा द्वितीया सुपारमुच्यते। तथा 'महतायासेनार्जितं धनं भुज्यमानं क्षीयते' इति तत्प्रक्षयं भावयतो विषयोपरमे या तुष्टिः सा तृतीया 'पारापारम्, उच्यते। एवं शब्दादिभोगाभ्यासात् प्रवर्धन्ते कामाः, ते च विषयाप्राप्तौ कामिनं दुःखाकुर्वन्ति' इति भोगदोषं भावयतो विषयोपरमे या तुष्टिः सा चतुर्थी 'अनुत्तमाम्भः' उच्यते। एवं 'नानुपहत्य भूतानि विषयोपभोगः सम्भवति' इति हिंसादोषदर्शनाद्विषयोपरमे या तृष्टिः सा पञ्चमी 'उत्तमाम्भः' उच्यते।

एवमाध्यात्मिकीभिश्चतसृभिः, बाह्याभिश्च पञ्चभिः, नवतृष्टमोऽभि-मताः'।। ५०।।

## ( ५१ )

**ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सृहृत्प्राप्तिः।**
**दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः।। ५१।।**

**अन्वय**–ऊहः शब्दः अध्ययनम्, त्रयः दुःखविघाताः सुहृत्प्राप्तिः दानम् च (इति) अष्टौ सिद्धयः (सन्ति) पूर्वः सिद्धेः त्रिविधिः अङ्कशः अस्ति।

### सांख्यतत्त्वकौमुदी–

गौणमुख्यभेदैः सिद्धीराह–''ऊह'' इति। विहन्यमानस्य दुःखस्य त्रित्वात्तद्विघातास्त्रय इतीमा मुख्यास्तिस्त्रः सिद्धयः, तदुपायतया त्वितरा गौण्यः

NOTES

NOTES

पञ्च सिद्धयः, ता अपि हेतुहेतुमत्तया व्यवस्थिताः। तत्राद्याध्यानलक्षणा सिद्धिर्हेतुरेव। मुख्यास्तु सिद्धयो हेतुमत्य एव। मध्यमास्तु हेतुहेतुमत्यः। विधिवत् गुरुमुखादध्यात्मविद्यानामक्षरस्वरूपग्रहणमध्ययनं प्रथमा सिद्धिस्तारमुच्यते। तत्कार्यं 'शब्द'; 'शब्दः' इति पदं शब्दजनितमर्थज्ञानमुपलक्षयति, कार्ये कारणोपचारात्। सा द्वितीया सिद्धिः 'सुतारम्' उच्यते। पाठार्थाभ्यां तदिदं द्विधा श्रवणम्। ''ऊहः'' तर्कः आगमाविरोधिन्यायेनागमार्थपरीक्षणम्। परीक्षणञ्च संशयपूर्वपक्ष-निराकरणेनोत्तरपक्षव्यवस्थापनम्। तदिदं मननमाचक्षते आगमिनः। सा तृतीया सिद्धिः 'तारतारम्' उच्यते। स्वोत्प्रेक्षितं मननममननमेवासुहृत्सम्मतमिति द्वितीयं मननमाह–''सुहृत्प्राप्तिः''। न्यायेन स्वयं परीक्षितमप्यर्थं न श्रद्धत्ते, न यावद् गुरुशिष्यसब्रह्मचारिभिः सह संवाद्यते। अतः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः 'सुहृत्प्राप्तिः'। सा सिद्धिश्चतुर्थी 'रम्यकम्' उच्यते। ''दानं'' च शुद्धिर्विवेकज्ञानस्य, 'दैप् शोधने' इत्यस्माद्धातोर्दानपदव्युत्पत्तेः। यथाह भगवान् पतञ्जलिः–विवेकख्यातिरविप्लवाहानोपायः' इति (योगसूत्रम् २/२६)। 'अविप्लवः' शुद्धिः, सा च सवासनसंशयविपर्यासानां परिहारेण विवेकसाक्षात्कारस्य स्वच्छप्रवाहेऽवस्थापनम्। सा च न विनादरनैरन्तर्यदीर्घ-कालसेविताभ्यासपरिपाकाद्भवतीति 'दानेन' विवेकख्यात्या कार्येण सोऽपि सङ्गृहीतः। सेयं पञ्चमी सिद्धिः 'सदामुदितम्' उच्यते। तिस्रश्च मुख्याः सिद्धयः प्रमोदमुदितमादमाना इत्यष्टौ सिद्धयः।

अन्ये व्याचक्षते–विनोपदेशादिना प्राग्भवीयाभ्यासवशात् तत्त्वस्य स्वयमूहनं यत्, सा सिद्धिरूहः। यस्य साङ्ख्यशास्त्रपाठमन्यदीयमाकर्ण्य तत्त्वज्ञानमुत्पद्यते सा सिद्धिः शब्द, शब्दपाठादनन्तरं भावात्। यस्य शिष्याचार्यसम्बन्धेन साङ्ख्यशास्त्रं ग्रन्थतोऽर्थतश्चाधीत्य ज्ञानमुत्पद्यते, साध्ययनहेतुका सिद्धिरध्ययनम्। सहृत्प्राप्तिरितियस्याधिगततत्त्वं सुहृदं प्राप्य ज्ञानमुत्पद्यते, या ज्ञानलक्षणा सिद्धितस्य सहृत्प्राप्तिः, दानञ्च सिद्धिहेतुः, धनादिदानेनाराधितो ज्ञानी ज्ञानं प्रयच्छति। अस्य च युक्तायुक्तत्वे सूरिभिरेवावगन्तव्ये इति कृतं परदोषोद्भावनेन नः सिद्धान्तमात्रव्याख्यानप्रवृत्तानामिति।

सिद्धितुष्टिविपर्ययेणाशक्तिर्बुद्धिबधस्सप्तदशधा द्रष्टव्यः। अत्र प्रत्ययसर्गे सिद्धिरुपादेयेति प्रसिद्धमेव। तन्निवारणहेतवस्तु विपर्ययाशक्तितुष्टयो हेया इत्याह–''सिद्धेः पूर्वोऽङ्कुशास्त्रिविधः'' इति। ''पूर्वः'' इति विपर्ययाशक्तितुष्टीः परामृशति। ताः सिद्धिकरिणीनामङ्कुशः निवारकत्वात्, अतः सिद्धिपरिपन्थित्वात् विपर्ययाशक्तितुष्टयो हेया इत्यर्थः।। ५१।।

NOTES

## ( ५२ )

**न विना भावेलिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः।**
**लिङ्गाख्यो भावाख्यस्तस्माद् द्विविधः प्रवर्तते सर्गः॥ ५२॥**

**अन्वय–**लिङ्गम् भावैः बिना न (भवति) भावनिर्वृतिः लिङ्गेन बिना न (भवति), तस्मात् (कारणात्) लिङ्ङ्गाख्यः भावाख्यः द्विविधः सर्गः प्रवर्तते।

## सांख्यतत्त्वकौमुदी–

स्यादेतत्, पुरुषार्थप्रयुक्ता सृष्टिः, स च पुरुषार्थः प्रत्ययसर्गाद्वा तन्मात्रसर्गाद्वा सिध्यतीति कृत-मुभयसर्गेणेत्यत आह–''न विना'' इति। ''लिङ्गम्'' इति तन्मात्रसर्गमुपलक्षयति, ''भावैः'' इति च प्रत्ययसर्गम्। एकदुक्तं भवति–तन्मात्रसर्गस्य पुरुषार्थसाधनत्वं स्वरूपञ्च न प्रत्ययसर्गाद्विना भवति। एवं प्रत्ययसर्गस्य स्वरूपं पुरुषार्थसाधनत्वञ्च न तन्मात्रसर्गादृते इत्युभयथा सर्गप्रवृत्तिः। भोगः पुरुषार्थो न भोग्यान् शब्दादीन् भोगायतनं शरीरद्वयञ्चान्तरेण सम्भवतीत्युपपन्नस्तन्मात्रसर्गः, एवं स एव भोगो भोगसाधनानीन्द्रियाण्यन्तः-करणानि चान्तरेण न सम्भवति। न च तानि धर्मादीन् भावान् बिना सम्भवन्ति। न चापवगंहेतुर्विवेकख्यातिरुभयसर्ग विना, इत्युपपन्न उभयविधः सर्गः। अनादित्वाच्च बीजाङ्कुरवन्नान्योन्याश्रयदोषमावहित। कल्पादावपि प्राचीन-कल्पोत्पन्नभावलिङ्गसंस्कारवशाद् भावलिङ्गयोरुत्पत्तिर्नानुपपन्नेति सर्वमवदातम्।

## ( ५३ )

**अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति।**
**मानुषकश्चैकविधः समासतो भौतिकः सर्गः॥ ५३॥**

**अन्वय–**दैवः अष्टविकल्पः तैर्यग्योनः च पञ्चधा मानुषकः च एकविधः भवति (इति) समासतः भौतिकः सर्गः (अस्ति)।

## सांख्यतत्त्वकौमुदी–

विभक्तः प्रत्ययसर्गः। भूतादिसर्ग विभजते–''अष्टविकल्प'' इति। ब्राह्मः, प्राजापत्यः ऐन्द्रः, पैत्रः, गान्धर्व, याक्षः, राक्षसः, पैशाचः इत्यष्टविधो ''दैवः'' सर्गः। 'तैर्यग्योनश्च पञ्चधा भवति,' पशुमृगपक्षिसरीसृपस्थावरा इति। ''मानुष कश्चैकविधः'' इति ब्राह्मणत्वाद्यवान्तरजातिभेदाविवक्षया, संस्थानस्य चतुर्ष्वपि

NOTES

वर्णष्वविशेषात् इति। ''समासत:'' सङ्क्षेपत: भौतिक: सर्ग:''। घटादयस्त्वशरीरत्वेऽपि स्थावरा एवेति।। ५३।।

## ( ५४ )

**ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः।**
**मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः॥ ५४॥**

**अन्वय**–सत्त्वविशाल: सर्ग: ऊर्ध्वं तमोविशाल: च मूलत: रजोविशाल: मध्ये (अस्ति) (इति) ब्रह्मादिस्तम्बपर्यन्त: (सृष्टि उक्त:)।

## सांख्यतत्त्वकौमुदी–

भौतिकस्यास्य सर्गस्य चैतन्योत्कर्षनिकर्षतारतम्याभ्यामूर्ध्वाधोमध्यभावेन त्रैविध्यमाह–''ऊर्ध्वं सत्त्वविशाल:'' इति। द्यूप्रभृतिसत्यान्तो लोक: सत्त्वबहुल:। ''तमोविशालश्च मूलत: सर्ग:'' पश्वादिस्थावरान्त:, सोऽयं मोहमयत्वानमोबहुल:।। भूर्लोकस्तु सप्तद्वीपसमुद्रसन्निवेशी ''मध्ये रजोविशाल:'' धर्माधर्मानुष्ठानपरत्वाद् दु:खबहुलत्वाच्च। तामिमां लोकसंस्थितिं सङ्क्षिपति ''ब्रह्मादिस्तम्बपर्यनत:'' स्तम्ब्रग्रहणेन वृक्षादय: सङ्गृहीता:।। ५४।।

## ( ५५ )

**तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः।**
**लिङ्गस्याविनिवृत्तेस्तस्माद् दुःखं स्वभावेन ॥ ५५॥**

**अन्वय**–तत्र चेनत: पुरुष: लिङ्गस्य अविनिवृत्ते: जरामरणकृतम् दु:खम् प्राप्नोति, तस्मात् स्वभावेन दु:खम् (विद्यते)।

## सांख्यतत्त्वकौमुदी–

तदेवं सर्ग दर्शयित्वा तस्यापवर्गसाधनवैराग्योपयोगिनीं दु:खहेतुतामाह–'तत्र' इति। 'तत्र' शरीरादौ। यद्यपि विविधविचित्रानन्दभोगभागिन: प्राणभृद्भेदा: तथापि सर्वेषां जरामरणकृतं दु:खमविशिष्टम्। सर्वस्य खलु, कृमेरपि मरणत्रासो–'मा न भूवं भूयासम्' इत्येवमात्मकोऽस्ति। दु:ख च भयहेतुरिति दु:खं मरणम्। स्यादेतत्; दु:खादय: प्राकृता: बुद्धिगुणा:, तत्कथमेते चेतनसम्बन्धिनो भवन्तीत्यत आह–''पुरुष:'' इति पुरिलिङ्गेशेते इति पुरुष:। लिङ्गं च तत्सम्बन्धीति चेतनोऽपि तत्सम्बन्धी भवतीत्यर्थ:। कुत: पुनर्लिङ्गसम्बन्धिदु:खं

NOTES

पुरुषस्य चेतनस्येत्यत आह–''लिङ्गस्याविनिवृत्तेः'' पुरुषाद्भेदाग्रहाल्लिङ्गधर्मा-नात्मन्यध्यवस्यति पुरुषः। अथवा दुःखप्राप्तावविधिराडा कथ्यते, लिङ्गं यावन्न निवर्तते तावदिति।। ५५।।

## ( ५६ )

**इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः।**
**प्रतिपुरुषविमोक्षार्थं स्वार्थः इव परार्थः आरम्भः।। ५६।।**

**अन्वय**–इति एषः महदादिविशेषभूतपर्यन्तः प्रकृतिकृतः आरम्भः प्रतिपुरुषविमोक्षार्थम् स्वार्थः इव परार्थः (अस्ति)।

## सांख्यतत्त्वकौमुदी–

उक्तस्य सर्गस्य कारणप्रतिपत्तीर्निराकरोति–''इत्येष'' इति। आरभ्यते इति ''आरम्भ'' सर्गः महदादिभूतान्ताः प्रकृत्यैव कृतो, नेश्वरेण, न ब्रह्मोपादानः, नाप्यकारणः। अकारणत्वे ह्यत्यन्तभावोऽत्यन्ताभावो वा स्यात्। न ब्रह्मोपादानः, चितिशक्तेरपरिणामात्। नेश्वराधिष्ठितप्रकृतिकृतः, निर्व्यापारस्याधिष्ठातृत्वासम्भवात्। न हि निर्व्यापारस्तक्षा वास्याद्यधितिष्ठति। ननु प्रकृतिकृतश्चेत्, तस्या नित्यायाः प्रवृत्तिशीलाया अनुपरमात् सदैव सर्गः स्यादिति न कश्चिन्मुच्येतेत्यत आह– ''प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः'' इति। यथौदनकाम ओदनाय पाके प्रवृत्तः ओदानसिद्धौ निवर्तते, एवं प्रत्येकं पुरुषान् माचयितुं प्रवृत्ता प्रकृतिर्यं पुरुषं मोचयति तं प्रति पुनर्न प्रवर्तते, तदिदमाह–'स्वार्थ इव' यथार्थे यथा तथा परार्थे आरम्भ इत्यर्थः।। ५६।।

## ( ५७ )

**वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।**
**पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य।। ५७।।**

**अन्वय**–यथा वत्सविवृद्धिनिमित्तम् अज्ञस्य क्षीरस्य प्रवृत्तिः (भवति), तथा पुरुषविमोक्षनिमित्तम् (अज्ञस्य) प्रधानस्य प्रवृत्तिः (भवति)।

## सांख्यतत्त्वकौमुदी–

स्यादेतत्, स्वार्थं परार्थं वा चेतनः प्रवर्तते न च प्रकृतिरचेतनैवं भवितुमर्हति। तस्मादस्ति प्रकृतेरधिष्ठाता चेतनः। न च क्षेत्रज्ञाश्चेतना अपि प्रकृतिमधिष्ठातुमर्हन्ति, तेषां प्रकृतिस्वरूपानभिज्ञत्वात्। तस्मादस्ति सर्वार्थदर्शी

प्रकृतेरधिष्ठाता, स चैश्वर इत्यत आह–दृष्टमचेतनमपि प्रयोजने प्रवर्त्तमानं, यथा वत्सविवृद्ध्यर्थं क्षीरमचेतनं प्रवर्तते। एवं प्रकृतिरचेतनापि पुरुषविमोक्षणाय प्रवर्तिष्यते। न च क्षीरप्रवृत्तेरपीश्वराधिष्ठाननिबन्धत्वेन साध्यत्वान्न साध्येन व्यभिचार' इति साम्प्रतम्। प्रेक्षावतः प्रवृत्तेःस्वार्थकारुण्याभ्यां व्याप्यत्वात् ते जगत्सर्गाद् व्यावर्तमाने प्रक्षावत्प्रवृत्तिपूर्वकत्वमपि व्यावर्तयतः। न ह्यवाप्तसकलेप्सितस्य भगवतो जगत् सृजतः किमप्यभिलषितं भवति। नापि कारुण्यादस्य सर्गे प्रवृत्तिः, प्राक् सर्गाज्जीवानामिन्द्रियशरीरविषयानुत्पत्तौ दुःखाभावेन कस्य प्रहाणेच्छा कारुण्यम्? सर्गोत्तरकालं दुःखिनोऽवलोक्य कारुण्याभ्युपगमे दुरुत्तरमितरेतराश्रयत्वं दूषणं, कारुण्येन सृष्टिः सृष्ट्या च कारुण्यमिति।

अपि च करुणया प्रेरित ईश्वरः सुखिन एव जन्तून् सृजेन्न विचित्रान्। कर्मवैचित्र्याद् वैचित्र्यमिति चेत्, कृतमस्य प्रेक्षावतः कर्माधिष्ठानेन? तदनधिष्ठानमात्रादेवाचेतनस्यापि कर्म्मणः प्रवृत्त्यनुपपत्तेस्तत्कार्यशरीरेन्द्रियविषयानुत्पत्तौ दुःखनिवृत्तेरपि सुकरत्वात्। प्रकृतेस्त्वचेतनायाः प्रवृत्तेर्न स्वार्थानुग्रहो न वा कारुण्यं प्रयोजकमिति नोक्तदोषप्रसङ्गावतारः। पारार्थ्यमात्रन्तु प्रयोजकमुपपद्यते। तस्मात्सूष्ठूक्तम्–''वत्सविवृद्धिनिमित्तम्'' इति।। ५७।।

## ( ५८ )

**औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः।**
**पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम्।। ५८।।**

**अन्वय**–यथा औत्सुक्यनिवृत्यर्थम् लोकः क्रियासु प्रवर्तते तदवत् पुरुषस्य विमोक्षार्थम् अव्यक्तम् प्रवर्तते।

## सांख्यतत्त्वकौमुदी–

''स्वार्थ इव'' इति दृष्टान्तितम्। तद्विभजते–''औत्सुक्यनिवृत्त्यर्थम्'' इति। औत्सुक्यमिच्छा, सा खल्विष्यमाणप्राप्तौ निवर्तते। इष्यमाणञ्च स्वार्थः, इष्टलक्षणत्वात् फलस्य। दार्ष्टान्तिके योजयति–''पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्त्'' इति।। ५८।।

## ( ५९ )

**रङ्गस्य दर्शयिता निवर्तते नर्तकी यथा नृत्यात्।**
**पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः।। ५९।।**

**अन्वय**–यथा नर्तकी रङ्गस्य दर्शयित्वा नृत्यात् निवृत्तते तथा प्रकृतिः पुरुषस्य आत्मानं प्रकाश्य विनिवर्तते।

NOTES

## सांख्यतत्त्वकौमुदी–

ननु भवतु पुरुषार्थः प्रकृतेः प्रवर्तकः, निवृत्तिस्तु कुतस्त्या प्रकृतेः? इत्यत आह–'रङ्गस्य', इति। ''रङ्गस्य'' इति स्थानेने स्थानिनः पारिषदानुपलक्षयति। 'आत्मानम्' शब्दाद्यात्मना पुरुषाद्भेदेन च प्रकाश्येत्यर्थः।। ५९।।

**( ६० )**

**नानाविधैरुपायैरूपकारिण्यनुपकारिणः पुंसः।**
**गुणवत्यगुणस्य सतः तस्यार्थमपार्थकं चरित।। ६०।।**

**अन्वय**–उपकारिणी गुणवती (प्राकृतिः) नानाविधैः तस्य अनुपकारिणः अगुणस्य सतः पुंसः अर्थम् अपार्थकम् चरति।

## सांख्यतत्त्वकौमुदी–

स्यादेतत् 'प्रवर्ततां प्रकृतिः पुरुषार्थम्, पुरुषादुपकृतात्प्रकृतिर्लप्स्यते कञ्चिदुपकारम्, आज्ञासम्पादनाराधितादिवाज्ञापयितुर्भुजिष्या, तथा च न परार्थोऽस्या आरम्भः' इत्यत आह–"नाना इति।"

यथा गुणवानप्युपकार्यपि भृत्यो निर्गुणेऽत एवानुपकारिणि स्वामिनि निष्फलाराधनः, एवमियं प्रकृतिस्तपस्विनी गुणवत्युपकारिण्यनुपकारिणि पुरुषे व्यर्थपरिश्रमेति पुरुषार्थमेव यतते न स्वार्थमिति सिद्धम्।। ६०।।

**( ६१ )**

**प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति।**
**या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य।। ६१।।**

**अन्वय**–प्रकृतेः सुकुमारतरं किञ्चित् न अस्ति इति मे मतिः भवति (यतो हि) या दृष्टा अस्मि इति पुनः पुरुषस्य दर्शनम् न उपैति।

## सांख्यतत्त्वकौमुदी–

स्यादेतत्; 'नर्तकी नृत्यं परिषद्भ्यो दर्शयित्वा निवृत्तापि पुनस्तद्द्रष्टृकौतूहलात् प्रवर्तने यथा, तथा प्रकृतिरपि पुरुषायात्मानं दर्शयित्वा निवृत्तापि पुनः प्रवर्त्स्यति' इत्यत आह–"प्रकृतेः" इति। सुकुमारतरतातिपेशलता, परपुरुषदर्शनासहिष्णुतेति

NOTES

यावत्। असूर्यम्पश्या हि कुलवधूरतिमन्दाक्षमन्थरा प्रमादाद्विगलितशिरोऽञ्चला चेदालोक्यते परपुरुषेण, तदासौ तथा प्रयतते अप्रमतं यथैनां पुरुषान्तराणि न पुनः पश्यन्ति इति। एवं प्रकृतिरपि कुलवधूतोऽप्यधिका, दृष्टा विवेकेन न पुनर्द्रक्ष्यत इत्यर्थः।। ६१।।

## ( ६२ )

**तस्मान्न बध्यतेऽद्धा मुच्यते नापि संसरति कश्चित्।**
**संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः।। ६२।।**

**अन्वय**—तस्मात् अद्धा न बध्यते, न मुच्यते, न अपि कश्चित् संसरति नानाश्रया प्रकृतिः संसरति, बध्यते मुच्यते च, (इति)।

### सांख्यतत्त्वकौमुदी—

स्यादेतत्—"पुरुषश्चेदगुणोऽपरिणामी, कथमस्य मोक्षः? मुचेर्बन्धनविश्लेषार्थ-त्वात्, सवासनक्लेशकर्माशयानां च बन्धनसमाख्यानां पुरुषेऽपरिणामिन्यसम्भवात्। अत एवास्य न संसारः प्रेत्यभावापरनामास्ति, निष्क्रियत्वात्। तस्मात् पुरुषविमोक्षार्थम् इति रिक्तं वचः" इतीमां शंकामुपसंहारव्याजेनाभ्युपगच्छन्नपाकरोति—"तस्मात्" इति। अद्धा न कश्चित् पुरुषो बध्यते, न कश्चित् संसरति, न कश्चिन्मुच्यते। प्रकृतिरेव तु नानाश्रया सती बध्यते संसरति मुच्यते चेति बन्धमोक्षसंसाराः पुरुषेषूपचर्यन्ते। यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्येते, तदाश्रयेण भृत्यानां तद्भागित्वात्, तत्फलस्य च शोकलाभादेः स्वामिनि सम्भवात्। भोगापवर्गयोश्च प्रकृतिगतयोरपि विवेकाग्रहात् पुरुषसम्बन्ध उपपादित इति सर्वं पुष्कलम्।। ६२।।

## ( ६३ )

**रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः।**
**सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण।। ६३।।**

**अन्वय**—प्रकृतिः तु आत्मना सप्तभिः रूपैः आत्मानम् एव बध्नाति सा एव च एकरूपेण पुरुषार्थम् प्रति विमोचयति।

### सांख्यतत्त्वकौमुदी—

नन्ववगतं प्रकृतिगता बन्धसंसारापवर्गाः 'पुरुषेषूपचर्यन्ते' इति। किंसाधनाः पुनरेते प्रकृतेरित्यत आह—"रूपैः" इति। तत्त्वज्ञानवर्जं बध्नाति धर्मादिभिः

सप्तभी "रूपैः" भावैरिति। "पुरुषार्थ प्रति" भोगापवर्गौ प्रति आत्मनात्मानम् "एकरूपेण" तत्त्वज्ञानेन विवेकख्यात्या विमोचयति पुनर्भोगापवर्गौ न करोतीत्यर्थः।। ६३।।

NOTES

( ६४ )

**एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।**
**अविपर्ययाद् विशुद्धं केवलमुत्पद्यते ज्ञानम्।। ६४।।**

**अन्वय**–एवम् तत्त्वाभ्यासात् न अस्मि, न मे, न अहम्, इति अपरिशेषम् अविपर्ययात् विशुद्धम् ज्ञानम् उत्पद्यते।

## सांख्यतत्त्वकौमुदी–

अवगतमीदृशं तत्त्वम्, ततः किमित्यत आह–"एवम्" इति। "तत्त्वेन" विषयेण तत्त्वज्ञानमुपलक्षयति। उक्तप्रकारतत्त्वविषयज्ञानाभ्यासादादरनैरन्तर्यदीर्घ-कालसेवितात् सत्त्वपुरुषान्यतासाक्षात्कारिज्ञानमुत्पद्यते, यद्विषयश्चाभ्यासस्तद्विषयक-मेव साक्षात्कारमुपजनयति, तत्त्वविषयश्चाभ्यास इति तत्त्वसाक्षात्कारं जनयति। अत उक्तम्–'विशुद्धम्' इति। कुतो विशुद्धमित्यत आह–"अविपर्ययात्" इति। संशयविपर्ययौ हि ज्ञानस्याविशुद्धिः, तद्रहितं विशुद्धम्; तदिदमुक्तम्–"अविपर्ययात्" इति। नियतमनियततया गृह्णन् संशयोऽपि विपर्ययः तेन 'अविपर्ययात्' इति संशयविपर्ययाभावो दर्शितः। तत्त्वविषयत्वाच्च संशयविपर्ययाभावः।

स्यादेतत्–'उत्पद्यतामीदृशाभ्यासात् तत्त्वज्ञानम्, तथाप्यनादिना मिथ्याज्ञान-संस्कारेण मिथ्याज्ञान जनयितव्यम्, तथा च तन्निबन्धनस्य संसारस्यानुच्छेदप्रसङ्ग इत्यत उक्तं'–"केवलम्" इति, विपयंयेणासम्भिन्नम्। यद्यप्यनादिविपर्ययवासना, तथापि यत्त्वज्ञानवासनया सत्त्वविषयसाक्षात्कारमादधत्यादिमत्यापि शक्या समुच्छेत्तुम्। तत्त्वपक्षपातो हि धियां स्वभावः, यदाहुर्बाह्या अपि– "निरुपद्रव-भूताथस्वभावस्य विपर्ययैः। न बाधोऽयत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः।।" इति।

ज्ञानस्वरूपमुक्तम्–"नास्मि, न मे, नाहम्" इति। 'नास्मि' इत्यात्मनि क्रियामात्रं निषेधति, यथाहुः–कृभ्वस्तयः क्रियासामान्यवचनाः, इति। तथा चाध्यवसायाभिमानसङ्कल्पालोचनानि चान्तराणि बाह्याश्च सर्वे व्यापारा आत्मनि प्रतिषिद्धानि बोद्धव्यानि। यतश्चात्मनि व्यापारावेशो नास्त्यतो 'नाहम्' अहमिति कर्तृपदम् 'अहं जानामि, अहं जुहोमि, अहंददे', इति सर्वत्र कर्तृः परामर्शात्। निष्क्रियत्वे च सर्वत्र कर्तृत्वाभावः। ततः सुष्ठूक्तम्–"नाहम्" इति। अतएव

NOTES

"न मे"। कर्ता हि स्वामितां लभेत; तस्मात् कुतः स्वाभाविकी स्वामितेत्यर्थः। अथवा 'नास्मि' इति, "पुरुषोऽस्मि, न प्रसवधर्मा"। अप्रसवधर्मित्वाच्चाकर्तृत्वमाह–"नाहम्" इति। अकर्तृत्वाच्च न स्वामितत्याह–"न मे" इति।

ननु एतावत्सु ज्ञातेष्वपि कश्चित् कदाचिदज्ञातो विषयोऽस्ति तदज्ञानं जन्तून् बन्धयिष्यति इत्यत आह–"अपरिशेषम्" इति। नास्ति, किञ्चिदस्मिन् परिशिष्टं ज्ञातव्यं, यदज्ञानं जन्तून् बन्धयिष्यतीत्यर्थः।। ६४।।

## ( ६५ )

**तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम्।**
**प्रकृति पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वच्छः।। ६५।।**

**अन्वय**–तेन प्रेक्षकवत् अवस्थितः स्वच्छः पुरुषः अर्थवशात् निवृत्तप्रसवाम् सप्तरूपनिवृत्ताम् प्रकृतिम् पश्यति।

## सांख्यतत्त्वकौमुदी–

कि पुनरीदृशेन तत्त्वसाक्षात्कारेण सिद्धयतीत्यत आह–'तेन' इति। भोगविवेकसाक्षात्कारौ हि प्रकृतिप्रसोतव्यौ। तौ च प्रसूताविति नास्याः प्रसोतव्यमवशिष्यत इति निवृत्तप्रसवा प्रकृतिः। विवेकज्ञानरूपो योऽर्थस्तस्य वशः सामर्थ्यम्, तस्मात्। अतत्त्वज्ञानपूर्वकाणि खलु धर्माधर्माज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि। वैराग्यमपि केवलतौष्टिकानामतत्त्वज्ञानपूर्वकमेव। तत्र तत्त्वज्ञानं विरोधित्वेनातत्त्वज्ञानमुच्छिनत्ति। कारणनिवृत्त्या च सप्तरूपनिवृत्ता प्रकृतिः। "अवस्थितः" इति निष्क्रियः, "स्वच्छः" इति रजस्तमोवृत्तिकलुषया बुद्ध्यासम्भिन्नः। सात्त्विक्या तु बुद्ध्या तदाप्यस्य मनाक्सम्भेदोऽस्त्येव, अन्यथैवम्भूतप्रकृतिदर्शनानुपत्तेरिति।। ६५।।

## ( ६६ )

**दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या।**
**सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य।। ६६।।**

**अन्वय**–एकः मया दृष्टा इति उपेक्षकः अन्या अहम् दृष्टा इति उपरमति (अतः) तयोः संयोगे सति अपि सर्गस्य प्रयोजनम् नास्ति।

## सांख्यतत्त्वकौमुदी–

स्यादेतत्–निवृत्तप्रसवामिति न मृष्यामहे, संयोगकृतो हि सर्ग इत्युक्तम्, योग्यता च संयोगः, भोक्तृत्वयोग्यता च पुरुषस्य चैतन्यम्, भोग्यत्वयोग्यता च प्रकृतेर्जडत्वम्, न चैतयोरस्ति निवृत्तिः, न च करणीयाभावान्निवृत्तिः, तज्जातीयस्यान्यस्य करणीयत्वात्, पुनः पुनः शब्दाद्युपभोगात्, इत्यत आह–'दृष्टा मया' इति। करोतु नाम पौनःपुन्येन शब्दाद्युपभोगं प्रकृतिर्यया विवेकख्यातिर्न कृता, कृतविवेकख्यातिस्तु शब्दाद्युपभोगं न जनयति। अविवेकख्यातिनिबन्धनो हि तदुपभोगः निबन्धनाभावे न भवितुमर्हति, अङ्कुर इव बीजाभावे। प्राकृतान् हि सुखदुःखमोहात्मनः शब्दादीस्तदविवेकात् 'ममैते' इत्यभिमन्यमान आत्मा भुञ्जीत। एवं विवेकख्यातिमपि प्राकृतीमविवेकादेवात्मा 'मदर्थेयम्' इति मन्यते। उत्पन्नविवेकख्यातिस्तु तदसंसर्गाच्छब्दादीन्नोपभोक्तुमर्हति। पुरुषार्थौ च भोगविवेकौ प्रकृत्यारम्भप्रयोजकावित्यपुरुषार्थो सन्तौं न प्रकृतिं प्रयोजयतः। तदिदमुक्तम्–"प्रयोजनं नास्ति सर्गस्य" इति। अत्र प्रयुज्यते सर्गे प्रकृतिरनेनेति 'प्रयोजनम्', तदपुरुषार्थे नास्तीत्यर्थः।। ६६।।

### ( ६७ )

**सम्यग्ज्ञानाधिगमात् धर्मादीनामकारणप्राप्तौ।**
**तिष्ठति संस्कारवशात् चक्रभ्रमिवद् धृतशरीरः।। ६७।।**

**अन्वय**–सम्यग्ज्ञानाधिगमात् धर्मादीनाम् अकारणप्राप्तौ संस्कारवशात् चक्रभ्रमिवत् धृतशरीरः तिष्ठति।

## सांख्यतत्त्वकौमुदी–

स्यादेतत्–"उत्पन्नतत्त्वसाक्षात्कारान्मुक्तश्चेत्तदनन्तरमेव मुक्तस्य तस्य देहपातः स्यादिति कथमदेहः प्रकृति पश्येत्। अथ तत्त्वज्ञानेऽपि न मुच्यते कर्मणामक्षीणत्वात्, तेषां कुतः प्रक्षयः? भोगात् इति चेत्, हन्त भोः। न तत्त्वज्ञानं मोक्षसाधनम् इति 'व्यक्ताव्यक्तज्ञविज्ञानजन्मना तत्त्वज्ञानेनापवर्गः' इति रिक्तं वचः। भोगेन चापरिसङ्ख्येयः कर्माशयप्रचयोऽनियतविपाककालः क्षेतव्यः, ततश्चापवर्गप्राप्तिः, इत्यपि मनोरथमात्रम्" इत्यत आह–"सम्यक्" इति। तत्त्वसाक्षात्कारोदया-देवानादिरप्यनियतविपाककालोऽपि कर्माशयप्रचयो दग्धवीजभावतया न जात्यायुर्भोगलक्षणाय फलाय कल्पते। क्लेशसलिलावसिक्तायां हि बुद्धिभूमौ कर्मबीजान्यङ्कुरं प्रसुवते। तत्त्वज्ञाननिदाघनिपीतसकलक्लेशसलिलायामूषरायां

NOTES

NOTES

कुतः कर्मबीजानामङ्कुरप्रसवः? तदिदमुक्तम्–"धर्मादीनामकारणप्राप्तौ" इति, अकारणत्वप्राप्तावित्यर्थः। उत्पन्नतत्त्वज्ञानोऽपि च संस्कारवशात् तिष्ठति, यथोपरतेऽपि कुलालव्यापारे चक्रे वेगाख्यसंस्कारवशात् भ्रमत् तिष्ठति। कालपरिपाकवशात् तूपरते संस्कारेनिष्क्रियं भवति। शरीरस्थितौ च प्रारब्धकर्मपरिपाकौ धर्माधर्मौ संस्कारौ, तौ च भोगेन क्षेतव्यौ। तथा चानुश्रयते–"तस्य तावदेव चिरं यावन्न विमोक्ष्येऽक्ष सम्पत्स्ये" इति (छा. ६/१४/२)। प्रक्षोयमाणाविद्यासंस्कारावशेषश्च 'संस्कारः तद्वशात् तत्सामर्थ्यात् धृतशरीरस्तिष्ठति।'

## ( ६८ )

**प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ।**
**ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति॥ ६८॥**

**अन्वयशब्दार्थ–**शरीरभेदे प्राप्ते चरितार्थत्वात् प्रधानविनिवृत्तौ (पुरुषः) एकान्तिकम् आत्यन्तिकम् उभयम् कैवल्यम् आप्नोति।

## सांख्यतत्त्वकौमुदी–

स्यादेतत्–"यदि संस्कारशेषादपि धृतशरीरस्तथापि कदास्य मोक्षो भविष्यति"? इत्यत आह–"प्राप्ते" इति। अनारब्धविपाकानां तावत् कर्माशयानां तत्त्वज्ञानाग्निना बीजभावो दग्धः। प्रारब्धविपाकानां तूपभोगेन क्षये सति, प्राप्ते 'शरीरभेदे' इति विनाशे, 'चरितार्थत्वात्' इति कृतप्रयोजनत्वात् प्रधानस्य तं पुरुषं प्रति विनिवृत्तौ "ऐकान्तिकम्" अवश्यम्भावि, "आत्यन्तिकम्" अविनाशि, इत्युभयं "कैवल्यम्" दुःखत्रयविगमं प्राप्नोति पुरुषः।। ६८।।

## ( ६९ )

**पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम्।**
**स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम्॥ ६९॥**

**अन्वय–**इदम् गुह्यम् पुरुषार्थज्ञानम् परमर्षिणासमाख्यातम् यत्र भूतानां स्थित्युत्पत्तिप्रलयाः चिन्त्यन्ते।

## सांख्यतत्त्वकौमुदी–

प्रमाणेनोपपादितेऽप्यत्यन्तश्रद्धोत्पादनाय परमर्षिपूर्वकत्वमाह–"पुरुष" इति। "गुह्यम्" गुहानिवासि, स्थूलधियां दुर्बोधमिति यावत्। "परमर्षिण" कपिलेन।

तामव श्रद्धामार्गामकत्वेन द्रढ़यति–“स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम्” इति। ‘यत्र’ ज्ञाने–यदर्थम्, यथा ‘चर्मणि द्वीपिनं हन्ति’ इति। “भूतानाम्” प्राणिनां “स्थित्युत्पत्तिप्रलया:” आगमै: “चिन्त्यन्ते”।। ६९।।

NOTES

## ( ७० )

**एतत्पवित्रमग्रयं मुनिरासुरयेऽनुकम्पया प्रददौ।**
**आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम्।। ७०।।**

**अन्वय**–एतत् पवित्रम् अग्रयं मुनि: अनुकम्पया आसुरये प्रददौ आसुरि: अपि, पञ्चशिखाय तेन च तन्त्रं बहुधाकृतम्।

## सांख्यतत्त्वकौमुदी–

स्यादेतत्–“यत् परमर्षिणा साक्षात्कथितं तच्छ्द्दधीमहि, यत्पुनरीश्वरकृष्णेन कथितं, तत्र कुत: श्रद्धा?” इत्यत आह–“एतत्” इति। एतत् “पवित्रम्” पावनं दु:खत्रयहेतो: पाप्मन: पुनातीति, “अग्रयम्” सर्वेभ्य: पवित्रेभ्यो मुख्यम्, “मुनि:” कपिल:, आसुरयेऽनुकम्पया प्रददौ, आसुरिरपि पञ्चशिखाय, तेन बहुधा कृतं तन्त्रम्।

## ( ७१ )

**शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभि:।**
**संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम्।। ७१।।**

**अन्वय**–शिष्यपरम्परया आगम् एतत् सिद्धान्तम् सम्यग्विज्ञाय आर्यमतिना ईश्वरकृष्णेन आर्याभि: संक्षिप्तम्।

## सांख्यतत्त्वकौमुदी–

“शिष्य” इति। आरात् याता तत्त्वेभ्य इत्यार्या, आर्या मतिर्यस्य सोऽयम् “आर्यमति:” इति।। ७१।।

## ( ७२ )

**सप्तत्यां किल येऽर्थास्तेऽर्था: कृत्स्नस्य षष्टितन्त्रस्य।**
**आख्यायिकाविरहिता: परवादविवर्जिताश्चापि।। ७२।।**

NOTES

**अन्वय**–सप्तत्याम् ये अर्थाः ते कृत्स्नस्य षष्टितन्त्रस्य आख्यायिकाविरहिताः परवादविवर्जिताः च अपि अर्थाः किल (सन्ति)।

## सांख्यतत्त्वकौमुदी–

एतच्च 'शास्त्रं', सकलशास्त्रार्थसूचकत्वात्, न तु प्रकरणमित्याह–"सप्तत्याम्" इति। तथा च राजवार्तिकम्–"प्रधानास्तित्वमेकत्वमर्थवत्त्वमथान्यता। पारार्थ्यं च तथानैक्यं वियोगो योग एव च।। शेषवृत्तिरकर्तृत्वंमौलिकार्थाः स्मृता दश। विपर्ययः पञ्चविधस्तथोक्ता नव तुष्टयः।। करणनामसामर्थ्यमष्टाविंशतिधा स्मृतम्। इति षष्टिः पदार्थानामष्टाभिः सह सिद्धिभिः।।" इति। सेयं षष्टिपदार्थी कथितेति सकलशास्त्रार्थकथनान्नेदं प्रकरणमपि तु शास्त्रमेवेदमिति सिद्धम्। एकत्त्वमर्थवत्त्वं पारार्थ्यञ्च प्रधानमधिकृत्योक्तम्। अन्यत्वममर्तृत्त्वं बहुत्वञ्चेति पुरुषमधिकृत्य, अस्तित्वं वियोगो योगश्चेत्युभयमधिकृत्य। वृत्तिः स्थितिरिति स्थूलसूक्ष्ममधिकृत्य।

**मनांसि कुमुदानीव बोधयन्ती सतां सदा।**
**श्रीवाचस्पतिमिश्राणां कृतिः स्यात् तत्त्वकौमुदी।।**

❖❖❖

NOTES

**UNIT–III**

# इकाई–तृतीय

# वेदान्तसारः–१

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम॥

*(श्रीमद्भगवद्गीता ८/२१)*

यथा मुञ्जादिषीकैवमात्मा युक्त्या समुद्धृतः।
शरीरतृतीयाद्धीरैः परं ब्रह्मैव जायते॥ *(पञ्चदशी १/४२)*

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥

*(कठो. २/५/८)*

सन्नाप्यसन्नाप्युभयात्मिका नो
भिन्नाप्यभिन्नाप्युभयात्मिका नो।
साङ्गाप्यनङ्गाप्युभयात्मिका नो
महाद्भुतानिर्वचनीयरूपा॥ *(विवेक चूडामणि, १११)*

अनादि भावरूपं यद् विज्ञानेन विलीयते।
तदज्ञानमिति प्राज्ञा लक्षणं संप्रचक्षते॥ *(चित्सुखी-१/९)*

प्रत्यक्षं तावदहमज्ञः, अन्यं च न जानामि इत्यपरोक्षावभासदर्शनात्
*(पञ्चपादिका विवरण-प्रकाशात्मयति-पृ. ७४)*

"न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः" *(५/१४)*

घनच्छन्नदृष्टिर्घनच्छन्नमर्कं
यथा मन्यते निष्प्रभं चातिमूढः।

NOTES

**तथा बद्धवद् भाति यो मूढ़दृष्टेः**
**स नित्योपलब्धिस्वरूपोऽहमात्मा॥** *(हस्तामलक-१०)*

**बहिष्प्रज्ञो विभुर्विश्वो ह्यन्तः प्रज्ञस्तु तैजसः।**
**धनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः॥**
*(माण्डूक्योपनिषद्, गौडपादकारिका-१)*

**"कर्तृत्वभोक्तृत्वविशिष्टजीवो मनोमयादिपञ्चकोशविशिष्टः"**
*(बृहदारण्यकोपनिषद् शाङ्करभाष्य १/४/१५)*

**यथा मुञ्जादिषीकैवमात्मा युक्त्वा समुद्धृतः।**
**शरीरतृतीयाद्घोरैः परं ब्रह्मैव जायते॥** *(पञ्चदशी-१/३३)*

## वेदान्तसारः

**अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्।**
**आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये॥ १॥**

**अन्वय**–अखण्डं सच्चिदानन्दम् अवाङ्मनसगोचरम् अखिलाधारम् आत्मानम् अभीष्टसिद्धये आश्रये।

## तत्त्वपारिजात

**यन्मायाशक्तितः स्वप्नगन्धर्वपुरसन्निभः।**
**मानमेयादिरूपोऽयं व्यवहारोऽखिलस्तथा॥ १॥**

**नामरूपात्मकोऽनादिः संसारो यदुपाश्रयात्।**
**अनुत्पन्नोऽपि वस्तुत उत्पन्न इव भासते॥ २॥**

**यस्मिन् मूढधियस्त्वद्धा जगज्जन्मादिकर्तृताम्।**
**मानमेयत्वमेवं चारोपयन्ति मृषैव तम्॥ ३॥**

**अप्रमेयं स्वयञ्ज्योतिः सच्चिदानन्दविग्रहम्।**
**वासुदेवं समस्ताभिर्वृत्तिभिः प्रणतोऽस्म्यहम्॥ ४॥**

**यस्यानन्तसुधाम्भोधेः सँल्लब्धां कणिकामपि।**
**नालं तुलयितुं लोकत्रयैश्वर्याप्तिजं सुखम्॥ ५॥**

**परनिर्वृतिरूपोऽसौ वासुदेवोऽस्मदुत्थिताः।**
**समस्तवासनावृत्तीर्नयतु निजपादयोः॥ ६॥**

NOTES

**सम्यङ् निर्णीय श्रुत्यर्थं लोकांस्तु तदपेक्षकान्।**
**श्रुतिविप्रतिपन्नान् यः सद्वर्त्मानीतवान् विभुः॥ ७॥**

**भगवन्तं तमाचार्यशङ्करं सज्जगद्गुरुम्।**
**एवं विषादनैराश्ये समुत्सार्येह जीवने॥ ८॥**

**यश्च सञ्चारयामासानन्दं चातिप्रफुल्लताम्।**
**परमेशस्वरूपं तं पूज्यं नत्वा स्वसद्गुरुम्॥ ९॥**

**सन्तनारायणः शास्त्री योगीन्द्रस्य कृताविह।**
**सदानन्दस्य वेदान्तसारे राष्ट्रस्य भाषया॥ १०॥**

**पूर्वाचार्यानुगां तत्त्वपारिजाताभिधामिमाम्।**
**प्रस्तौम्यभिनवां व्याख्यां रञ्जनार्थं स्वचेतसः॥ ११॥**

**वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः।**
**वृक्षान्तरात् सजातीयो विजातीयः शिलादितः॥**

**तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते।**
**ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमात्॥**

*(पञ्चदशी २/२०, २१)*

**न व्यापित्वाद् देशतोऽन्तो नित्यत्वान्नापि कालतः।**
**न वस्तुतोऽपि सार्वात्म्यादानन्त्यं ब्रह्मणि त्रिधा॥**

*(पञ्चदशी ३/३५)*

अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरस-मगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नाति कश्चन। —*(बृहदा. ३।८।८)*

**अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः**
**गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति॥ २॥**

**अन्वय**—अतीतद्वैतभानतः अर्थतः अपि अद्वयानन्दान् गुरून् आराध्य यथामति वेदान्तसारं वक्ष्ये।

**गुरुचरणसरोजसन्निधानादपि वयमस्य गुणैकलेशभाजः।**
**अपि महति जलार्णवे निमग्नाः सलिलमुपाददते मितं हि मीनाः॥**

—*(सङ्क्षेपशारीरक १/६)*

NOTES

वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च। अस्य वेदान्तप्रकरणत्वात् तदीयैरेवानुबन्धैस्तद्वत्तासिद्धेर्न ते पृथगालोचनीया:।। ३।।

**शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्।**
**आहु: प्रकरणं नाम ग्रन्थभेदं विपश्चित:।।**

*–(पराशरोपपुराण १८/२१, २२; तथा कैवल्यरत्न पृष्ठ ४५)*

**तत्रानुबन्धो नामाधिकारिविषयसम्बन्धप्रयोजनानि।। ४।।**

## तत्त्वपारिजात

"शास्त्रस्यादौ वक्तव्येष्वधिकारिविषयप्रयोजनसम्बन्धेषु। 'ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते। ग्रन्थादौ तेन वक्तव्य: सम्बन्ध: सप्रयोजन:।।' इत्युक्तेर्विषय-प्रयोजनादीनामारम्भप्रयोजकत्वात्तद्धेतुत्वम्। अस्मिन् पक्षे चानुबध्यतेऽनेनेति करणे: घञ्।"

अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्त: साधनचतुष्टयसम्पन्न: प्रमाता।। ५।।

**इहासने शुष्यतु मे शरीरं त्वगस्थिमांसं प्रलयं च यातु।**
**अप्राप्य बोधं बहुकल्पदुर्लभं नैवासनात् कायमनश्चलिष्यते।।**

**किं प्रमत्तस्य बहुभि: परोक्षैर्हायनैरिह।**
**वरं मुहूर्त्तं विदितं घटेत श्रेयसे यत:।।**
**खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुष:।**
**मुहूर्तात् सर्वमुत्सृज्य गतवानभयं हरिम्।।**

*–(श्रीमद्भागवत २/१/१२-१३)*

**न हि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति।**

*–(गीता ६/४०)*

**स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्।** *–(गीता २/४०)*

**तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्।**
**यतते च ततो भूय: संसिद्धौ कुरुनन्दन।।**

**प्रयत्नाद् यतमानस्तु योगी संशुद्धकिल्बिष:।**
**अनेकजन्मसंसिद्धस्ततो याति परां गतिम्।।**

*–(गीता ६/४३, ४५)*

**अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्।**
**षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्॥**

–(*स्वयंप्रकाशमुनि*)

काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि। निषिद्धानि नरकाद्यनिष्ट-साधनानि ब्राह्मणहननादीनि। नित्यान्यकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि। नैमित्तिकानि पुत्रजन्माद्यनुबन्धीनि जातेष्ट्यादीनि। प्रायश्चित्तानि पापक्षयसाधनानि चान्द्रायणादीनि। उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्य-विद्यादीनि।। ६।।

## तत्त्वपारिजात

(१) **काम्यानि**–'फलोद्देशेन विधीयमानानि कर्माणि काम्यानि'

(२) **निषिद्धानि**–'भ्रमावगतेष्टसाधनतानिषेधकनञ्पदयोगिवाक्यगम्यानि निषिद्धानि'

**पञ्च सूना गृहस्थस्य चुल्ली पेपण्युपस्करः।**
**कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्॥**

–(*मनु. ३/६८*)

**तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः।**
**पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्॥**

**अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।**
**होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥**

**पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः।**
**स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते॥**

–(*मनु. ३/६८-७१*)

**एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्धयेत्।**
**उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम्॥**

–(*मनु. ११/२१६*)

सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मान्तर्हृदय एतद् ब्रह्मैतमितः प्रेत्याभिसम्भवितास्मीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्यः शाण्डिल्यः। –(*छान्दोग्य. ३/१४/१*)

NOTES

एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनमुपासनानां तु चित्तैकाग्र्यम्। "तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन" इत्यादिश्रुतेः, "तपसा कल्मषं हन्ति" इत्यादिस्मृतेश्च। नित्यनैमित्तिकयोरुपासनानां चावान्तरफलं पितृलोकसत्यलोकप्राप्तिः "कर्मणा पितृलोको विद्यया देवलोक" इत्यादिश्रुतेः।। ७।।

"तत्र कानिचिद् ब्रह्मण उपासनान्यभ्युदयार्थानि, कानिचित् क्रममुक्त्यर्थानि, कानिचित् कर्मसमृद्ध्यर्थानि।" *–(१/१/११)*

'उपासनं तु यथाशास्त्रसमर्थितं किञ्चिदालम्बनमुपादाय तस्मिन् समानचित्तवृत्तिसन्तानकरणं तद्विलक्षणप्रत्ययानन्तरितमिति।'

*–(छान्दोग्योपनिषद्भाष्यभूमिका)*

"नित्यकर्मानुष्ठानाद्धर्मोत्पत्तिर्धर्मोत्पत्तेः पापहानिस्ततश्चित्तशुद्धिस्ततः संसारयाथात्म्यावबोधस्ततो वैराग्यं ततो मुमुक्षुत्वं ततस्तदुपायपर्येषणं ततः सर्वकर्मसंन्याससस्ततो योगाभ्यासस्ततश्चित्तस्य प्रत्यक्प्रवणता ततस्तत्त्वमस्यादिवाक्यार्थपरिज्ञानं ततोऽविद्योच्छेदस्ततः स्वात्मन्यवस्थानमिति।"

*–(नैष्कर्म्यसिद्धि १/५२)*

साधनानि नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमादिषट्कसम्पत्ति मुमुक्षुत्वानि। नित्यानित्यवस्तुविवेकस्तावद् ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम्। ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानां कर्मजन्यतयानित्यत्व वदामुष्मिकाणामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविरागः। शमादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः। शमस्तावच्छ्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः। दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्त्तनम्। निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः, अथवा विहितानां कर्मणां विधिना परित्यागः। तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता। निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्। गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा। मुमुक्षुत्वं मोक्षेच्छा। एवम्भूतः प्रमाताधिकारी "शान्तो दान्त" इत्यादिश्रुतेः। उक्तञ्च–

**प्रशान्तचित्ताय जितेन्द्रियाय च**
**प्रहीणदोषाय यथोक्तकारिणे।**
**गुणान्वितायानुगताय सर्वदा**
**प्रदेयमेतत् सकलं मुमुक्षवे।। ८।।**

**अन्वय**–प्रशान्तचित्ताय, जितेन्द्रियाय, प्रहीणदोषाय, यथोक्तकारिणे, गुणान्विताय, अनुगताय च मुमुक्षवे एतत् सकलं सर्वदा प्रदेयम्।

NOTES

## तत्त्वपारिजात

"तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते।"

–*(छान्दोग्योपनिषद् ८।१।६)*

**श्वोभावा मर्त्यस्य यदन्तकैतत्**
**सर्वेन्द्रियाणां जरयन्ति तेजः।**
**अपि सर्वं जीवितमल्पमेव**
**तवैव वाहास्तव नृत्यगीते॥** –*(कठोपनिषद् १/१/२६)*

**यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्।**
**तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्॥**

–*(महाभारत १२/६६३६/ अध्याय १७)*

**योगारूढस्य तस्यैव शमः कारणमुच्यते।** –*(गीता ६/३)*
**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।**

**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥** –*(गीता १/५८)*

**प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम्।**

**आत्मन्यग्नीन् समारोप्य ब्राह्मणो प्रव्रजेद् गृहात्॥**

–*(मनु. ६/३८)*

**"न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः॥"**

–*(महानारा. १०।५)*

**"वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः॥"**

–*(मुण्डक. ३।२।६)*

**"एतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्ति।"**

–*(बृहदा. माध्य. ४/४/२५)*

**"पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च**
**व्युत्थायाथ भिक्षाचर्यं चरन्ति।"**

–*(बृहदारण्यकोपनिषद् ३/५/१)*

**"नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति।"** –*(गीता १८/४८)*

NOTES

**"त्वम्पदार्थविचाराय संन्यासः सर्वकर्मणाम्।"**

*–(उपदेशसाहस्री १८/२२२)*

**"अर्थस्य मूलं निकृतिः क्षमा च, कामस्य रूपं च वपुर्वयश्च।**
**धर्मस्य यागादि दया दमश्च, मोक्षस्य सर्वोपरमः क्रियाभ्यः॥"**

*–(सङ्क्षेपशारीरक ३/३६६)*

**"प्रवृत्तिलक्षणो योगो, ज्ञानं संन्यासलक्षणम्।**
**तस्माज्ज्ञानं पुरस्कृत्य, संन्यसेदिह बुद्धिमान्॥"**

*–(महाभारत १४/११९५/ अध्याय ४३)*

**मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।**
**आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥** *–(गीता २/१४)*

**मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।** *–(गीता १२/८)*

**अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।**
**आचार्योपासनं शौचं स्थैर्मयात्मविनिग्रहः॥**

**इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च।**
**जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥**

**असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।**
**नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥**

**मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।**
**विविक्तदेशसेवित्वमरतिर्जनसंसदि॥**

**अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।**
**एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥**

*–(गीता १३/७-११)*

**अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।**
**असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥** *–(गीता १७/२८)*

**अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।**
**असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥** *–(गीता १७/२८)*

**प्रश्न–**'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥' *–(बृहदा. ४/४/७)*

NOTES

**उत्तर**–अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामः।

– *(बृहदारण्यकोपनिषद् ४/४/६)*

**"शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति।"**

–*(बृहदारण्यकोपनिषद् ४/४/२३)*

**श्रद्धैव वित्तमस्येति नान्यदस्य यतस्ततः।**
**श्रद्धावित्तोऽयमित्युक्तः संन्यासे सर्वकर्मणाम्॥**

–*(बृहदारण्यकोपनिषद्भाष्यवार्तिक ६/४)*

**श्रद्धान्वितायाथ गुणान्विताय परापवादाद् विरताय नित्यम्।**
**विशुद्धयोगाय बुधाय नित्यं क्रियावते च क्षमिणे हिताय॥**

**विविक्तशीलाय विधिप्रियाय विवादहीनाय बहुश्रुताय।**
**विजानते चैव न चाहितक्षमे दमे च शक्ताय शमे च देयम्॥**
**जितेन्द्रियायैतदसंशयं ते भवेत् प्रदेयं परमं नरेन्द्र॥**

–*(मोक्षधर्म, अध्याय ३०६)*

विषयो जीवब्रह्मैक्यं शुद्धचैतन्य[१] प्रमेयं तत्रैव वेदान्तानां तात्पर्यात्। सम्बन्धस्तु[२] तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावलक्षणः[३]। प्रयोजनं तु[४] तदैक्यप्रमेयगताज्ञाननिवृत्तिः[५] स्वस्वरूपानन्दावाप्तिश्च "तरति शोकमात्मवित्" इत्यादिश्रुतेः, "ब्रह्म वेद[६] ब्रह्मैव भवति" इत्यादिश्रुतेश्च॥ ९॥

**"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।"**

–*(बृहदा. २/४/५)*

**श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।**
**मत्वा च सततं ध्येय एते दर्शनहेतवः॥**

–*(बृहदारण्यकवार्तिक २/४/३०४ में उद्धृत)*

अयमधिकारी जननमरणादिसंसारानलसन्तप्तो [७]दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति, "समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इत्यादिश्रुतेः। स[८] परमकृपयाध्यारोपापवादन्यायेनैनमुपदिशति, "तस्मै स विद्वानुपसन्नाय प्राह" इत्यादिश्रुतेः॥ १०॥

---

१. **"शुद्धं चैतन्यम्"** इति पा.। २. **"सम्बन्धश्चैक्यप्रमेयस्य"** इति पा.। ३. **"बोध्यबोधकभावः"** इति पा.। ४. क्वचित्पाठे **"तु"** नास्ति। ५. **"तत्स्वरूप."** इति पाठभेदः। ६. **"ब्रह्मविद्"** इति पाठभेदः। ७. **''प्रदीप्त.''** इति पाठान्तरम्। ८. **''स गुरुः''** इति पाठान्तरम्।

NOTES

**जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते।**
**विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते॥**

**"शास्त्रज्ञोऽपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यात्।"**
*– (मुण्डक. १/२/१२ पर शाङ्करभाष्य)*

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥** *–(गीता ४/३४)*

**एतदेव हि दयालुलक्षणं यद्विनेयजनबुद्धिवर्धनम्।**
*–(सङ्क्षेपशारीरक ४।३।६)*

**"स्मृतिरूपः परत्र पूर्वदृष्टावभासः"** *–(अध्यासभाष्य)*

**अतस्मिंस्तद्बुद्धिः प्रभवति विमूढस्य तमसा**
**विवेकाभावाद् वै स्फुरति भुजगे रज्जुधिषणा।**
**ततोऽनर्थव्रातो निपतति समादातुरधिकस्ततो योऽसद्ग्राहः स हि भवति बन्धः शृणु सखे॥** *–(विवेकचूडामणि १४०)*

**न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा।**
*–(गीता १५।३)*

**अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते।**
**शिष्याणां बोधसिद्ध्यर्थं तत्तज्ज्ञैः कल्पितः क्रमः॥**

असर्पभूतायां[१] रज्जौ सर्पारोपवद् वस्तुन्यवस्त्वारोपोऽध्यारोपः। वस्तु सच्चिदानन्दाद्वयं[२] ब्रह्म। अज्ञानादिसकलजडसमूहोऽवस्तु। अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात् "देवात्मशक्तिं स्वगुणैर्निगूढाम्" इत्यादिश्रुतेश्च॥ ११॥

**सन्नाप्यसन्नाप्युभयात्मिका नो**
**भिन्नाप्यभिन्नाप्युभयात्मिका नो।**
**साङ्गाप्यनङ्गाप्युभयात्मिका नो**
**महाद्भुतानिर्वचनीयरूपा॥** *–(विवेकचूडामणि १११)*

**तुच्छानिर्वचनीया च वास्तवी चेत्यसौ त्रिधा।**
**ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः॥**
*– (पञ्चदशी ६/१३०)*

---

१. **"असर्पभूते"** इति पाठान्तरम्। २. **"सच्चिदानन्दानन्ताद्वयम्"** इति पाठान्तरम्।

**अविद्याया अविद्यात्वमिदमेव तु लक्षणम्।**
**यत्प्रमाणासहिष्णुत्वमन्यथा वस्तु सा भवेत्॥**

–(*बृहदारण्यकवार्त्तिक श्लोक सं. १८१*)

**अज्ञानं ज्ञातुमिच्छेद् यो मानेनात्यन्तमूढधीः।**
**स तु नूनं तमः पश्येद् दीपेनोत्तमतेजसा॥**

–(*वेदान्तसिद्धान्तमुक्तावली*)

**दुर्घटत्वमविद्याया भूषणं न तु दूषणम्।**
**कथञ्चिद् घटमानत्वेऽविद्यात्वं दुर्घटं भवेत्॥**

–(*इष्टसिद्धि १/१४०*)

**ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगुढाम्।**
**यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः॥**

–(*श्वेताश्वतर. १/३*)

**अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।** –(*गीता ५/१५*)
**नाहं प्रकाशः सर्वस्य योगमायासमावृतः।** –(*गीता ७/२१*)

इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते। तथाहि – यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशो, यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति, तथा नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः "अजामेकाम्" इत्यादिश्रुतेः। इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना। एतदुपहितं चैतन्यं सर्वज्ञत्व-सर्वेश्वरत्वसर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते, सकलाज्ञानावभासकत्वात्। "यः सर्वज्ञः सर्ववित्" इतिश्रुतेः। ईश्वरस्येयं समष्टिरखिलकारणत्वात्कारणशरीरमानन्दप्रचुरत्वात्कोशव- दाच्छाद-कत्वाच्चानन्दमयकोशः सर्वोपरमत्वात्सुषुप्तिरत एव स्थूलसूक्ष्मप्रपञ्चलयस्थान-मिति चोच्यते॥ १२॥

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।**
**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥**

–(*श्वेताश्वतरोपनिषद् ४/५*)

**यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः।**
**तस्माादेतद् ब्रह्म नाम रूपमन्नं च जायते॥**

–(*मुण्डक. १/१/६*)

NOTES

NOTES

यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशो, यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति, तथाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेश "इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादिश्रुतेः। अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः। इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना। एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यत एकाज्ञानावभासकत्वात्। अस्य प्राज्ञत्वमस्पष्टोपाधितयानतिप्रकाशकत्वात्। अस्यापीयमहङ्कारादिकारणत्वात् कारणशरीरमानन्दप्रचुरत्वात् कोशवदाच्छाद-कत्वाच्चानन्दमयकोशः सर्वोपरमत्वात् सुषुप्तिरत एव स्थूलसूक्ष्मशरीर-प्रपञ्चलयस्थानमिति चोच्यते।। १३।।

**मायाबिम्बो वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः।**
**अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा।।**

*–(पञ्चदशी १/१६, १७)*

तदानीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानन्दमनुभवत "आनन्दभुक् चेतोमुखः प्राज्ञ" इतिश्रुतेः, सुखमहमस्वाप्सं न किञ्चिदवेदिष-मित्युत्थितस्य परामर्शोपपत्तेश्च। अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलाशयलयारिव वाभेदः। एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिबिम्बाकाशयोरिव वाभेद "एष सर्वेश्वर" इत्यादिश्रुतेः।। १४।।

"यत्र सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति, तत्सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः।" *–(मन्त्र ५)*

**जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा।**
**अविद्या तच्चितोर्योगः षडस्माकमनादयः।।** –(?)

"एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्।" *–(माण्डूक्य. ६)*

वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलतद्गतप्रतिबिम्बाकाशयोर्वाधारभूतानु-पहिताकाशवदनयोरज्ञानतद्रुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीय-मित्युच्यते, "शिवमद्वैतं चतुर्थं मन्यन्त" इत्यादिश्रुतेः। इदमेव तुरीयं शुद्धचैतन्य-मज्ञानादितद्रुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते।। १५।।

**मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।**
**रूढेः प्रयोजनाद्वासौ लक्षणाशक्तिरर्पिता।।**

–(*साहित्यदर्पण २।५*)

अस्याज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयम्। आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव, तथाज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव, तादृशं सामर्थ्यम्। तदुक्तम्–

**"घनच्छन्नदृष्टिर्घनच्छन्नमर्कं**
**यथा मन्यते निष्प्रभं चातिमूढः।**
**तथा बद्धवद् भाति यो मूढदृष्टेः**
**स नित्योपलब्धिस्वरूपोऽहमात्मा।।" इति।।**

अनयैवावरणशक्त्यावच्छिन्नस्यात्मनः कर्त्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुच्छसंसारभावनापि सम्भाव्यते, यथा स्वाज्ञानेनावृतायां रज्ज्वां सर्पत्वसम्भावना।

विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयत्येवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्याकाशादिप्रपञ्चमुद्भावयति, तादृशं सामर्थ्यम्। तदुक्तम्–

**"विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजेत्" इति।। १६।।**

**अन्वय–**यथा अतिमूढः घनच्छन्नदृष्टिः (सन्) अर्कं घनच्छन्नं निष्प्रभं च मन्यते, तथा मूढदृष्टेः यः (आत्मा) बद्धवत् भाति, सः नित्योपलब्धिस्वरूपः आत्मा (एव) अहम्।

**आदौ मनस्तदनु बन्धविमोक्षदृष्टी**
**पश्चात् प्रपञ्चरचना भुवनाभिधाना।**
**इत्यादिका स्थितिरियं हि गता प्रतिष्ठा–**
**माख्यायिका सुभग बालजनोदितेव।।**

–(*पञ्चदशी १३/२१*)

**बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः।**
**गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम्।।** –(*११/११/१*)

शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति। यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति।।१७।।

NOTES

NOTES

**यथोर्णनाभिः सृजते गृह्णते च**
**यथा पृथिव्यामोषधयः सम्भवन्ति।**
**यथा सतः पुरुषात्केशलोमानि**
**तथाक्षरात्सम्भवतीह विश्वम्।।** –(*मुण्डक. १।१।६*)

**न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।**
**न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता।।**
– (*माण्डूक्यकारिका २।३२*)

तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाश आकाशाद्वायुर्वायोरग्नि-रग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्यादिश्रुतेः। तेषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्कारणस्य। तदानीं सत्त्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषूत्पद्यन्ते। एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते। एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते।। १८।।

'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद् विजिज्ञासस्व, तद् ब्रह्मेति।' –(*तैति. ३/१/१*)

**'सदेव सोम्येदमग्र आसीत्।'** –(*छान्दो. ३/२/१*)
**'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।'**
–(*मुण्डक. २/१/३*)

**'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते।'** –(*गीता १०/८*)

**'बीजं मां सर्वभूतानां विद्धि पार्थं सनातनम्।'** –(*गीता ७/१०*)

**अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।**
**आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्।।**
–(*वाक्यसुधा २०*)

सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि। अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति। ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षु-र्जिह्वाघ्राणाख्यानि। एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते। बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः। मनो नाम सङ्कल्पविकल्पात्मिकान्तःकरणवृत्तिः। अनयोरेव चित्ताहङ्कारयोरन्तर्भावः। एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यन्ते। एतेषां प्रकाशात्मकत्वात् सात्त्विकांशकार्यत्वम्।। १६।।

**बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया।**
**शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते॥**

*–(पञ्चदशी १/२३)*

**सत्त्वांशैः पञ्चभिस्तेषां क्रमाद्धीन्द्रियपञ्चकम्।**
**श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते॥**

*–(पञ्चदशी १/१९)*

**तैरन्तःकरणं सर्वैर्वृत्तिभेदेन तद् द्विधा।**
**मनो विमर्शरूपं स्याद् बुद्धिः स्यान्निश्चयात्मिका॥**

*–(पञ्चदशी १/२०)*

**तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।** *–(१४/६)*

इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति। अयं कर्तृत्व-भोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेनेहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते। मनस्तु ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशो भवति।।२०।।

**सात्त्विकैर्धीन्द्रियैः साकं विमर्शात्मा मनोमयः।**
**तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिका॥**

*–(पञ्चदशी १/३५)*

कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि। एतानि पुनराकाशादीनां रजोंऽशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते। वायवः प्राणापानव्यानोदानसमानाः। प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्त्ती। अपानो नामावाग्गमनवान् पाय्वादिस्थानवर्त्ती। व्यानो नाम विष्वग्गमनवानखिलशरीरवर्त्ती। उदानो नाम कण्ठस्थानीय ऊर्ध्वगमनवानुत्क्रमणवायुः। समानो नाम शरीरमध्यगताशितपीतान्नादिसमी-करणकरः ।। २१।।

"चक्षुश्च द्रष्टव्यं च, श्रोत्रं च श्रोतव्यं च, घ्राणं च घ्रातव्यं, रसश्च रसयितव्यं च, त्वक् च स्पर्शयितव्यं च, वाक् च वक्तव्यं च, हस्तौ चादातव्यं चोपस्थश्चानन्दयितव्यं च, पायुश्च विसर्जयितव्यं च, पादौ च गन्तव्यं च, मनश्च मन्तव्यं च, बुद्धिश्च बोद्धव्यं चाहङ्कारश्चाहङ्कर्त्तव्यं च, चित्तं च चेतयितव्यं च, तेजश्च विद्योतयितव्यं च, प्राणश्च विधारयितव्यं च।"

**"अन्नमयं हि सोम्य मनः आपोमयः प्राणस्तेजोमयी वाक्।"**

*–(छान्दोग्य. ६/५/४)*

NOTES

NOTES

**रजोंऽशैः पञ्चभिस्तेषां क्रमात्कर्मेन्द्रियाणि तु।**
**वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे।।**

*–(पञ्चदशी १/२१)*

"अतो यान्ययानि वीर्यवन्ति कर्माणि यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानस्तानि करोति।" *–(छान्दोग्य. १/३/५)*

केचितु नागकूर्मकृकलदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीति वदन्ति। तत्र नाग उद्गिरणकरः। कूर्म उन्मीलनकरः। कृकलः क्षुत्करः। देवदत्तो जृम्भणकरः। धनञ्जयः पोषणकरः। एतेषां प्राणादिष्वन्तर्भावात् प्राणादयः पञ्चैवेति केचित्।। २२।।

**उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः।**
**कृकलस्तु क्षुति ज्ञेयो देवदत्तो विजृम्भणे।।**
**न जहाति मृतञ्चापि सर्वव्यापी धनञ्जयः।**

*–(गोरक्षाशतक ३५-३६)*

**नागो हिक्काकरः कूर्मो निमेषोन्मेषकारकः।**
**क्षुतं करोति कृकलो देवदत्तो विजृम्भणम्।।**
**स्थौल्यं धनञ्जयः कुर्यान्मृतं च न विमुञ्चति।**

*–(मानसोल्लास ९/१४-१५)*

एतत् प्राणादिपञ्चकमाकाशादिगतरजोंऽशेभ्यो मिलितेभ्य उत्पद्यते। इदं प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत् प्राणमयकोशो भवति। अस्य क्रियात्मकत्वेन रजोंऽशकार्यत्वम्।। २३।।

एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः। मनोमय इच्छाशक्तिमान् करणरूपः। प्राणमयः क्रियाशक्तिमान् कार्यरूपः। योग्यत्वादेवमेतेषां विभाग इति वर्णयन्ति। एतत् कोशत्रयं मिलितं सत् सूक्ष्मशरीरमित्युच्यते।। २४।।

अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिरनेक-बुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरपि भवति। एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राणश्चेत्युच्यते सर्वत्रानुस्यूतत्वाज्ज्ञानेच्छाक्रिया-शक्तिमद्रुपहितत्वाच्च। अस्यैषा समष्टिः स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नोऽत एव स्थूलप्रपञ्चलयस्थानमिति चोच्यते।। २५।।

**सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः।**
**अप एव ससर्जादौ तासु बीजमवासृजत्॥**

**तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।**
**तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः॥**

*– (मनुस्मृति १।८-९)*

एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति तेजोमयान्तःकरणोपहितत्वात्। अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नोऽत एव स्थूलशरीरलयस्थानमिति चोच्यते।। २६।।

एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः "प्रविविक्त-भुक्तैजस" इत्यादिश्रुतेः। अत्रापि समष्टिव्यष्ट्योस्तदुपहित- सूत्रात्मतैजसयोर्वन-वृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्चाभेदः। एवं सूक्ष्मशरीरोत्पत्तिः।। २७।।

**प्रत्यूषे वा प्रदोषे वा मग्नो मन्दे तमस्ययम्।**
**लोको भाति यथा तद्वदस्पष्टं जगदीक्ष्यते॥**

*–(पञ्चदशी ६।२०१)*

स्थूलभूतानि तु पञ्चीकृतानि। पञ्चीकरणं त्वाकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य, तेषु दशसु भागेषु प्राथमिकान् पञ्च भागान् प्रत्येकं चतुर्धा समं विभज्य, तेषां चतुर्णां भागानां स्वस्वद्वितीयार्धभागपरित्यागेन भागान्तरेषु संयोजनम्। तदुक्तम्–

**द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।**
**स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते॥ इति॥ २८॥**

**पृथिव्यादीनि भूतानि प्रत्येकं विभजेद् द्विधा।**
**एकैकं भागमादाय चतुर्धा विभजेत् पुनः॥ ८॥**

**एकैकं भागमेकस्मिन् भूते संवेशयेत्क्रमात्।**
**ततश्चाकाशभूतस्य भागाः पञ्च भवन्ति हि॥ ९॥**

**वाय्वादिभागाश्चत्वारो वाय्वादिष्वेवमादिशेत्।**
**पञ्चीकरणमेतत्स्यादित्याहुस्तत्त्ववेदिनः॥ १०॥**

NOTES

NOTES

अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणत्वात्। पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च "वैशेष्यात्तद्वादस्तद्वाद" इतिन्यायेनाकाशादिव्यपदेशः सम्भवति। तदानीमाकाशे शब्दोऽभिव्यज्यते वायौ शब्दस्पर्शावग्नौ शब्दस्पर्शरूपाण्यप्सु शब्दस्पर्शरूपरसाः पृथिव्यां शब्दस्पर्शरूपरसगन्धारच।। २९।।

## तत्त्वपारिजात

**(१)** त्रिवृत्करणश्रुतेः–''सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति'' *(छान्दोग्य. ६/३/२-३)*

"आकाशस्य सर्वावकाशतया सर्वाव्यतिरेकाद्वायोश्च सर्वचेष्टाहेतुत्वेन सर्वाविनाभूतत्वात्तयोस्तेजःप्रभृतिष्वन्तर्भावं सिद्धवत्कृत्य त्रिवृत्करणं प्रयोगसौकर्यार्थं श्रुतिर्वर्णयाम्बभूव।" *–(विद्वन्मनोरञ्जनी उद्धृत)*

**यत्रोभयोः समो दोषः परिहारोऽपि वा समः।**
**नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे।।**

एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यो भूर्भुवःस्वर्महर्जनस्तपःसत्यमित्येतन्नामकानामुपर्युपरि विद्यमानानामतलवितलसुतलरसातलतलातलमहातलपातालनामकानामधोऽधो विद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्वर्तिचतुर्विधस्थूलशरीराणां तदुचितानामन्नपानादीनां चोत्पत्तिर्भवति। चतुर्विधशरीराणि तु जरायुजाण्डजोद्भिज्जस्वेदजाख्यानि। जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि। अण्डजान्यण्डेभ्यो जातानि पक्षिपन्नगादीनि। उद्भिज्जानि भूमिमुद्भिद्य जातानि कक्षवृक्षादीनि। स्वेदजानि स्वेदेभ्यो जातानि यूकामशकादीनि।। ३०।।

"द्वात्रिंशतं वै देवरथाह्न्यान्ययं लोकस्तं समन्तं पृथिवी द्विस्तावत् पर्येति, तां समन्तं पृथिवीं द्विस्तावत् समुद्रः पर्येति।" *–(बृहदा. ३/३/२)*

अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिर्वृक्षवज्जलवद्वा व्यष्टिरपि भवति। एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडिति चोच्यते, सर्वनराभिमानित्वाद् विविधं राजमानत्वाच्च। अस्यैषा समष्टिः स्थूलशरीरमन्नविकारत्वादन्नमयकोशः स्थूलभोगायतनत्वाच्च स्थूलशरीरं जाग्रदिति च व्यपदिश्यते।। ३१।।

NOTES

एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते, सूक्ष्मशरीराभिमानमपरित्यज्य स्थूलशरीरादिप्रविष्टत्वात्। अस्याप्येषा व्यष्टिः स्थूलशरीरमन्नविकारत्वादेव हेतोरन्नमयकोशो जाग्रदिति चोच्यते।। ३२।।

"सूक्ष्मशरीरं कारणशरीरं तदपरित्यज्य स्थूलशरीरादौ तदपेक्षया स्थूलशरीरं लिङ्गशरीरं तदादिर्यस्य परमस्थूलशरीरस्येति तद्गुणसंविज्ञानो बहुव्रीहिस्तस्मिन् प्रविष्टत्वात्।"

तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन क्रमाच्छब्दस्पर्शरूपरसगन्धान्, अग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियन्त्रितेन वागादीन्द्रियपञ्चकेन क्रमाद्वचनादानगमनविसर्गानन्दान्, चन्द्रचतुर्मुखशङ्कराच्युतैः क्रमान्नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येनान्तरिन्द्रियचतुष्केण क्रमात्सङ्कल्पनिश्चयाहङ्कार्यचैत्तांश्च सर्वानेतान् स्थूलविषयाननुभवतो "जागरितस्थानो बहिष्प्रज्ञ" इत्यादिश्रुतेः। अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितविश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्च पूर्ववदभेदः। एवं पञ्चीकृतपञ्चभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः।। ३३।।

**इन्द्रियैरर्थविज्ञानं देवतानुग्रहान्वितैः।**
**शब्दादिविषयं ज्ञानं तज्जागरितमुच्यते।।**

– *(पञ्चीकरणवार्त्तिक १३)*

**तस्याग्निरास्यं निर्भिन्नं लोकपालोऽविशत्पदम्।**
**वाचा स्वांशेन वक्तव्यं ययासौ प्रतिपद्यते।**

**निर्भिन्नं तालु वरुणो लोकपालोऽविशद्धरेः।**
**जिह्वयांशेन च रसं ययासौ प्रतिपद्यते।।**

**निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदम्।**
**घ्राणेनांशेन गन्धस्य प्रतिपत्तिर्यतो भवेत्।।**

**निर्भिन्ने अक्षिणी त्वष्टा लोकपालोऽविशद्विभोः।**
**चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत्।।**

**निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत्।**
**प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते।।**

**कर्णावस्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः।**
**श्रोत्रेणांशेन शब्दस्य सिद्धिं येन प्रपद्यते।।**

NOTES

**मेढ्रं तस्य विनिर्भिन्नं स्वधिष्ण्यं क उपाविशत्।**
**रेतसांशेन येनासावानन्दं प्रतिपद्यते।**

**गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत्।**
**पायुनांशेन येनासौ विसर्गं प्रतिपद्यते।।**

**हस्तावस्य विनिर्भिन्नाविन्द्रः स्वर्पतिराविशत्।**
**वार्तयांशेन पुरुषो यया वृत्तिं प्रपद्यते।।**

**पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत्।**
**गत्या स्वांशेन पुरुषो यया प्राप्यं प्रपद्यते।**

**बुद्धिं चास्य विनिर्भिन्नां वागीशो धिष्ण्यमाविशत्।**
**बोधेनांशेन बोद्धव्यप्रतिपत्तिर्यतो भवेत्।।**

**हृदयं चास्य निर्भिन्नं चन्द्रमा धिष्ण्यमाविशत्।**
**मनसांशेन येनासौ विक्रियां प्रतिपद्यते।।**

**आत्मानं चास्य निर्भिन्नमभिमानोऽविशत्पदम्।**
**कर्मणांशेन येनासौ कर्त्तव्यं प्रतिपद्यते।**

**सत्त्वं चास्य विनिर्भिन्नं महान् धिष्ण्यमुपाविशत्।**
**चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते।।**

एतेषां स्थूलसूक्ष्मकारणप्रपञ्चानामपि समष्टिरेको महान् प्रपञ्चो भवति, यथावान्तरवनानां समष्टिरेकं महद्वनं भवति, यथा वावान्तरजलाशयानां समष्टिरेको महान् जलाशयः। एतदुपहितं वैश्वानरादीश्वरपर्यन्तं चैतन्यमप्यवान्तर-वनावच्छिन्नाकाशवदवान्तरजलाशयगतप्रतिबिम्बाकाशवच्चैकमेव।। ३४।।

❖❖❖

NOTES

**UNIT–IV**

# इकाई-चतुर्थ

# वेदान्तसारः–२

आभ्यां महाप्रपञ्चतदुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्तं सदनुपहितं चैतन्यं "सर्वं खल्विदं ब्रह्म" इति वाक्यस्य वाच्यं भवति, विविक्तं सल्लक्ष्यमपि भवति। एवं वस्तुन्यवस्त्वारोपोऽध्यारोपः सामान्येन प्रदर्शितः।। ३५।।

**एतावानस्य महिमातो ज्यायांश्च पूरुषः।**
**पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि।।**

–(*ऋग्वेदसंहिता १०/९०/३*)

**विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्।**
**इति कृष्णोऽर्जुनायाह जगतस्त्वेकदेशताम्।।**

–(*पञ्चदशी २/५६*)

इदानीं प्रत्यगात्मनीदमिदमयमयमारोपयतीति विशेषत उच्यते। अतिप्राकृतस्तु "आत्मा वै जायते पुत्रः" इत्यादिश्रुतेः, स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात्, पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति।। ३६।।

**पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराङ्पश्यति नान्तरात्मन्।**
**कश्चिद् धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्।।**

–(*कठ. २/१/१*)

"यथारुन्धतीं दिदर्शयिषुस्तत्समीपस्थां स्थूलां तारामुख्यां प्रथममरुन्धतीति ग्राहयित्वा तां प्रत्याख्याय पश्चादरुन्धतीमेव ग्राहयति तद्वत्।"

–(*ब्रह्मसूत्रशाङ्करभाष्य १/१/८*)

**यथा मुञ्जादिषीकैवमात्मा युक्त्या समुद्धृतः।**
**शरीरत्रितयाद् धीरैः परं ब्रह्मैव जायते।।**

–(*पञ्चदशी १/४२*)

NOTES

**अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः।**
**तं स्वाच्छरीरात् प्रवहेन्मुञ्जादिवेषीकां धैर्वेण।**
**तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति॥**

*—(कठ. २।३।१७)*

चार्वाकस्तु "स वा एष पुरुषोऽन्नरसमयः" इत्यादिश्रुतेः, प्रदीप्तगृहात् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्, स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति।। ३७।।

**न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः।**
**नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः॥ १॥**

**अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्।**
**बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः॥ २॥**

**पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति।**
**स्वपिता जयमानेन तत्र कस्मान्न हिंस्यते॥ ३॥**

**मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम्।**
**गच्छतामिह जन्तूनां व्यर्थं पाथेयकल्पनम्॥ ४॥**

**स्वर्गस्थिता यदा तृप्तिं गच्छेयुस्तत्र दानतः।**
**प्रासादस्योपरिस्थानामत्र कस्मान्न दीयते॥ ५॥**

**यावज्जीवेत् सुखं जीवेद् ऋणं कृत्वा घृतं पिबेत्।**
**भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥ ६॥**

**यदि गच्छेत्परं लोकं देहादेष विनिर्गतः।**
**कस्माद् भूयो न चायाति बन्धुस्नेहसमाकुलः॥ ७॥**

**ततश्च जीवनोपायो ब्राह्मणैर्विहितस्त्विह।**
**मृतानां प्रेतकार्याणि न त्वन्यद्विद्यते क्वचित्॥ ८॥**

**त्रयो वेदस्य कर्त्तारो भण्डधूर्त्तनिशाचराः।**
**जर्फरीतुर्फरीत्यादि पण्डितानां वचः स्मृतम्॥ ९॥**

**अश्वस्यात्र हि शिश्नं तु पत्नीग्राह्यं प्रकीर्तितम्।**
**भण्डैस्तद्वत्परं चैव ग्राह्यजातं प्रकीर्त्तितम्॥१०॥**

**मांसाना खादनं तद्वन्निशाचरसमीरितम्। इति॥**

*—(सर्वदर्शनसङ्ग्रहे चार्वाकदर्शनम्)*

NOTES

**"न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति।"** *–(बृहदा. २/४/५)*

**"तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा।"** *–(बृहदा. १।४।८)*

अपरश्चार्वाकः "ते ह प्राणाः प्रजापतिं पितरमेत्योचुः" इत्यादि-श्रुतेरिन्द्रियाणामभावे शरीरचलनाभावात्, काणोऽहं बधिरोऽहमित्याद्यनु-भवाच्चेन्द्रियाण्यात्मेति वदति।। ३८।।

अपरश्चार्वाकः "अन्योऽन्तर आत्मा प्राणमयः" इत्यादिश्रुतेः, प्राणाभाव इन्द्रियादिचलनायोगाद्, अहमशनायावानहं पिपासावानित्याद्यनुभवाच्च प्राण आत्मेति वदति।। ३९।।

अन्यस्तु चार्वाकः "अन्योऽन्तर आत्मा मनोमयः" इत्यादिश्रुतेर्मनसि सुप्ते प्राणादेरभावादहं सङ्कल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति।। ४०।।

बौद्धस्तु "अन्योऽन्तर आत्मा विज्ञानमयः" इत्यादिश्रुतेः, कर्त्तुरभावे करणस्य शक्त्यभावाद्, अहं कर्त्ताहं भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति।। ४१।।

प्राभाकरतार्किकौ तु "अन्योऽन्तर आत्मानन्दमयः" इत्यादिश्रुतेर्बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञोऽहं ज्ञानीत्याद्यनुभवाच्चाज्ञानमात्मेति वदतः।। ४२।।

भाट्टस्तु "प्रज्ञानघन एवानन्दमयः" इत्यादिश्रुतेः, सुषुप्तौ प्रकाशाप्रकाश-सद्भावान्मामहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहितं चैतन्यमात्मेति वदति।। ४३।।

"स्वप्नजाग्रन्मनःस्पन्दनानि प्रज्ञानानि घनीभूतानीव सेयमवस्थाविवेकरूपत्वात् प्रज्ञानघत उच्चते। यथा रात्रौ नैशेन तमसाविभज्यमानं सर्वं घनमिव तद्वत्प्रज्ञानघन एव। एवशब्दान्न जात्यन्तरं प्रज्ञानव्यतिरेकेणास्तीत्यर्थः। मनसो विषयविषय्या-कारस्पन्दनायासदुःखाभावादानन्दमय आनन्दप्रायो नानन्द एव।" *–(माण्डूक्योपनिषदि पञ्चममन्त्रस्य शाङ्करभाष्यात्)*

अपरो बौद्धः "असदेवेदमग्र आसीत्" इत्यादिश्रुतेः, सुषुप्तौ सर्वाभावाद्, अहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति।। ४४।।

NOTES

एतेषां [1]पुत्रादीनामनात्मत्वमुच्यते। एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासै[2] र्बाधदर्शनात् पुत्रादीनामनात्मत्वं स्पष्टमेव।। ४५।।

किञ्च प्रत्यगस्थूलोऽचक्षुरप्राणोऽमना अकर्त्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रुतिविरोधाद्, अस्य पुत्रादिशून्यपर्यन्तस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वाद्, अहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यन्तमखिलमनात्मैव। अतस्तत्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मवस्त्विति[3] वेदान्तविदनुभवः[4]। एवमध्यारोपः।। ४६।।

अपवादो नाम रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववद् वस्तुविवर्त्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्। तदुक्तम्–

**"सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः।**
**अतत्त्वतोऽन्यथाप्रथा विवर्त्त इत्युदाहृतः।।" इति।। ४७।।**

तथाहि–एतद्भोगायतनं चतुर्विध[5] सकल[6] स्थूलशरीरजातम् एतद्भोग्यरूपान्नपानादिकमेतदायतन[7] भूतभूरादिचतुर्दशभुवनान्येतदायतन[8] भूतं ब्रह्माण्डं चैतत्सर्वमेतेषां कारणरूप[9] पञ्चीकृतभूतमात्रं भवति। एतानि शब्दादिविषयसहितानि पञ्चीकृतानि भूतानि सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां कारणरूपापञ्चीकृतभूतमात्रं भवति। एतानि सत्त्वादिगुणसहितान्यपञ्चीकृतान्युत्पत्तिव्युत्क्रमेणैतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति। एतदज्ञानमज्ञानोपहितं चैतन्यं चेश्वरादिकमेतदाधारभूतानुपहितचैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति।। ४८।।

आभ्यामध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोधनमपि सिद्धं भवति। तथाहि–अज्ञानादिसमष्टिरेतदुपाहितं सर्वज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति। एतदुपाध्युपहिताधार–

---

१. ''**पुत्रादीनां शून्यपर्यन्तानाम्**'' इति पाठान्तरम्।
२. ''**रात्मत्वबाध.**'' इति पाठान्तरम्।
३. ''**तत्त्वमिति**'' इति पाठान्तरम्।
४. ''**०विद्वदनुभवः**'' इति पाठान्तरम्।
५. ''**चतुर्विधं**'' इति पाठान्तरम्।
६. केषुचित् हस्तलेखेषु ''**सकल**'' इति नास्ति।
७. ''**आश्रय.**'' इति पाठान्तरम्।
८. ''**आश्रय.**'' इति पाठान्तरम्।
९. ''**कारणरूपपञ्चीकृत.**'' इति पाठान्तरम्।

NOTES

भूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति। अज्ञानादिव्यष्टिरेतदुपहिताल्पज्ञत्वादि-विशिष्टचैतन्यमेतदनुपहितं चैतत्त्रयं तप्ताय:पिण्डवदेकत्वेनावभासमानं त्वम्पदवाच्यार्थो भवति। एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वम्पदलक्ष्यार्थो भवति।। ४९।।

अथ महावाक्यार्थो वर्ण्यते। इदं "तत्त्वमसि" वाक्यं सम्बन्धत्रयेणाखण्डार्थ-बोधकं भवति। सम्बन्धत्रयं नाम पदयो:सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्य-भाव: प्रत्यगात्मपदार्थयोर्लक्ष्यलक्षणभावश्चेति। तदुक्तम्–

**"सामानाधिकरण्यं च विशेषणविशेष्यता।**
**लक्ष्यलक्षणसम्बन्ध: पदार्थप्रत्यगात्मनाम्।।" इति।। ५०।।**

**विना महावाक्यमतो न कश्चित्पुमांसमद्वैतमवैति जन्तु:।**

*–(सङ्क्षेपशारीरक ३/३०३)*

सामानाधिकरण्यसम्बन्धस्तावद्यथा 'सोऽयंदेवदत्त:' इत्यस्मिन् वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन् पिण्डे तात्पर्यसम्बन्ध:। तथात्र[१] 'तत्त्वमसि' इति वाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वम्पदस्य चैकस्मिंश्चैतन्ये तात्पर्यसम्बन्ध:।। ५१।।

विशेषणविशेष्यभावसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्काल-विशिष्टदेवदत्तस्यायंशब्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योऽन्यभेदव्यावर्तकतया विशेषणविशेष्यभाव:। तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वम्पदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योऽन्यभेदव्यावर्तकतया विशेषण-विशेष्यभाव: ।। ५२।।

लक्ष्यलक्षणसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभाव: तथात्रापि वाक्ये तत्त्वम्पदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्व-परित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभाव:। इयमेव भागलक्षणेत्युच्यते।। ५३।।

---

१. **''शब्दानां बोधनाशक्तेर्निमित्ते शक्यतावच्छेदके। यथा घटशब्दस्य प्रवृत्तिनिमित्तं घटत्वमेवं शुक्लादिशब्दस्य शुक्लत्वं पाचकादे: पाक: देवदत्तादेस्तत्तत् पिण्डादि। 'सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च' इति काव्यप्रकाश:।''**

२. **''तथा च''** इति पाठान्तरम्।

NOTES

अस्मिन् वाक्ये 'नीलमुत्पलम्' इति वाक्यवद् वाक्यार्थो न सङ्गच्छते। तत्र तु नीलपदार्थनीलगुणस्योत्पलपदार्थोत्पलद्रव्यस्य च शौक्ल्यपटादिभेदव्यावर्तकतयान्योऽन्यविशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रमाणान्तरविरोधाभावात् तद्वाक्यार्थः सङ्गच्छते। अत्र तु तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योऽन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणविरोधाद् वाक्यार्थो न सङ्गच्छते। तदुक्तम्–

**"संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः।**
**अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः॥" इति॥ ५४॥**

अत्र 'गङ्गायां घोषः प्रतिवसति' इतिवाक्यवज्जहल्लक्षणापि न सङ्गच्छते। तत्र तु गङ्गाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद् वाक्यार्थमशेषतः परित्यज्य तत्सम्बन्धितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा सङ्गच्छते। अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रे विरोधाद् भागान्तरमपि परित्यज्यान्यलक्षणाया अयुक्तत्वाज्जहल्लक्षणा न सङ्गच्छते।

न च गङ्गपदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयति, तथा तत्पदं त्वम्पदं वा स्वार्थपरित्यागेन त्वम्पदार्थं तत्पदार्थं वा लक्षयत्वतः कुतो जहल्लक्षणा न सङ्गच्छत इति वाच्यम्। तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वम्पदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात्॥ ५५॥

अत्र 'शोणो धावति' इतिवाक्यवदजहल्लक्षणापि न सम्भवति। तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात् तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधपरिहारसम्भवादजहल्लक्षणा सम्भवति। अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य विरुद्धत्वात् तदपरित्यागेन तत्सम्बन्धिनो यस्य कस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधपरिहारासम्भवादजहल्लक्षणा न सम्भवत्येव।

न च तत्पदं त्वम्पदं वा स्वार्थविरुद्धांशपरित्यागेनांशान्तरसहितं त्वम्पदार्थं तत्पदार्थं वा लक्षयत्वतः कथं प्रकारान्तरेण भागलक्षणाङ्गीकरणमिति वाच्यम्। एकेन पदेन स्वार्थांशपदार्थान्तरोभयलक्षणाया असम्भवात्, पदान्तरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच्च॥ ५६॥

तस्माद्यथा 'सोऽयं देवदत्तः' इति वाक्यं तदर्थो वा तत्कालैतत्काल-विशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद् विरुद्धतत्कालैतत्कालविशिष्टत्वांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयति, तथा 'तत्त्वमसि' इति वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद् विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वांशं परित्यज्याविरुद्धमखण्डचैतन्यमात्रं लक्षयतीति।। ५७।।

अथाधुना 'अहं ब्रह्मास्मि' इत्यनुभववाक्यार्थो वर्ण्यते। एवमाचार्येणाध्यारोपापवादपुरस्सरं तत्त्वम्पदार्थौ शोधयित्वा वाक्येनाखण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानन्दानन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरुदेति। सा तु चित्प्रतिबिम्बसहिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते। तदा पटकारणतन्तुदाहे पटदाहवदखिल-कार्यकारणेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदन्तर्भूताखण्डा-काराकारिता चित्तवृत्तिरपि बाधिता भवति। तत्र[१] प्रतिबिम्बितं चैतन्यमपि, यथा दीपप्रभादित्यप्रभावभासनासमर्था सती तयाभिभूता भवति, तथा स्वयम्प्रकाशमान-प्रत्यगभिन्नपरब्रह्मावभासनानर्हतया तेनाभिभूतं सत् [२]स्वोपाधिभूताखण्डचित्त-वृत्तेर्बाधितत्वाद् दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत् प्रत्यगभिन्नपरब्रह्ममात्रं भवति।। ५८।।

एवं च सति "मनसैवानुद्रष्टव्यम्", "यन्मनसा न मनुते" इत्यनयोः श्रुत्योरविरोधो वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात्। तदुक्तम्–

**"फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्" इति।**

**"ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता।**
**[३]स्वयम्प्रकाशमानत्वान्नाभास उपयुज्यते।।" इति च।।**

जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोऽस्ति। तथाहि–अयं घट इति घटाकारा-कारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपुरस्सरं स्वगतचिदाभासेन जडं घटमपि भासयति। तदुक्तम्–

**"बुद्धितत्स्थचिदाभासौ [४]द्वावपि व्याप्नुतो घटम्।**
**तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्।।" इति।।**

---

१. "**तत्र वृत्तौ**" इति पाठभेदः।
२. "**स्वोपाधिभूताखण्डवृत्ते.**" इति पाठभेदः।
३. "**स्वयंस्फुरणरूपत्वा.**" इति पाठान्तरम्।
४. "**द्वावेतौ.**" इति पाठभेदः।

NOTES

NOTES

यथा दीपप्रभामण्डलमन्धकारगतं घटपटादिकं विषयीकृत्य तद्गतान्धकार-निरसनपुरस्सरं स्वप्रभया तदपि भासयतीति।। ५९।।

''यथा ताडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति, तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते, स एव परिणामो वृत्तिरित्युच्यते।''

एवम्भूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवणमनननिदिध्यासनसमाध्यनुष्ठान-स्यापेक्षितत्वात्तेऽपि प्रदर्श्यन्ते। श्रवणं नाम षड्विधलिङ्गैरशेषवेदान्तानामद्वितीये[1] वस्तुनि तात्पर्यावधारणाम्। लिङ्गानि तूपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादो-पपत्त्याख्यानि। तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपपादनमुपक्रमोपसंहारौ। यथा छान्दोग्ये [2]षष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः "एकमेवाद्वितीयम्" इत्यादौ "ऐतदात्म्यमिदं सर्वम्" इत्यन्ते च प्रतिपादनम्। प्रकरणप्रतिपाद्यस्य [3]वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः। यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम्। प्रकरणप्रतिपाद्यस्य वस्तुनः[4] प्रमाणान्तराविषयीकरणमपूर्वता। यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणाम्। फलं तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम्। यथा तत्र "आचार्यवान् पुरुषो वेद, तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते। प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः। यथा तत्रैव "उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्" इत्यद्वितीयवस्तुप्रशंसनम्। प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिरुपपत्तिः। यथा तत्र "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते।। ६०।।

मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवतमनुचिन्तनम्। विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनम्। समाधिर्द्विविधः, सविकल्पको निर्विकल्पकश्चेति। तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम्।

---

१. ''**अद्वितीयवस्तुनः**'' इति पाठान्तरम्।
२. ''**षष्ठे प्रपाठके**'' इति पाठान्तरम्।
३. क्वचित् ''**वस्तुनः**'' इति नास्ति।
४. ''**अद्वितीयवस्तुनः**'' इति पाठान्तरम्।

NOTES

तदा मृन्मयगजादिभानेऽपि मृद्भानवद् द्वैतभानेऽप्यद्वैतं वस्तु भासते। तदुक्तम्[१]–

**दृशिस्वरूपं गगनोपमं परं**
**सकृद्विभातं त्वजमेकमक्षरम्।**
**अलेपकं सर्वगतं यदद्वयं**
**तदेव चाहं सततं विमुक्त[२] ओम्।। इति।। ६१।।**

निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानम्। तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवदद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमवभासते। ततश्चास्य सषुप्तेश्चाभेदशङ्का न भवति, उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः।। ६२।।

अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः। तत्र "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।" "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।" करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीन्यासनानि। रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः। इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः। अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा। तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहो ध्यानम्। समाधिस्तूक्तः सविकल्पक एव।। ६३।।

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।** –*गीता (६/१७)*

**यत्किञ्चिदेनः कुर्वन्ति मनोवाङ्मूर्त्तिभिर्जनाः।**
**तत्सर्वं निर्दहन्त्याशु तपसैव तपोधनाः।।** –*मनुस्मृति (११/२४१)*

**देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।**
**ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।।**

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।**

**मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।**
**भावसंशुद्धिरित्येतत्तपो मानसमुच्यते।।** –*गीता (१७/१४-१६)*

---

१. "**तदुक्तमभियुक्तैः**" "**तदुक्तमभिनीय**" इति पाठान्तरे।
२. "**विमुक्तमोम्**" इति पाठान्तरम्।

NOTES

श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः।
अफलाकाङ्‌क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥

सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्॥

—(*गीता १७।१७-१९*)

यद्‌दुस्तरं यद्‌दुरापं यद्‌दुर्गं यच्च दुष्करम्।
सर्वं तत्तपसा साध्यं तपो हि दुरतिक्रमम्॥

युञ्जीत प्रणवे चेतः प्रणवं ब्रह्म निर्भयम्।
—(*माण्डूक्यकारिका १।२५*)

ओमित्येवं ध्यायथ आत्मानम्। —(*मुण्डक० २।२।६*)

उपनिषदमावर्तयेत्। —(*आरुणेय० २*)

विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः।
उपांशुः स्याच्छतगुणः साहस्त्रो मानसः स्मृतः॥

स्वाध्यायाद् योगमासीत योगात् स्वाध्यायमामनेत्।
स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते॥
—(*योगभाष्य १।२८*)

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥

कामतोऽकामतो वापि यत्करोमि शुभाशुभम्।
तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम्॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात्।
करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत्॥

यद्वा फलानां संन्यासं प्रकुर्यात्परमेश्वरे।
कर्मणामेतदप्याहुर्ब्रह्मार्पणमनुत्तमम्॥

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥

NOTES

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥
*—(श्वेता० ६।१८)*

तमेव शरणं गच्छ सर्वभावेन भारत। *—(गीता १८।६२)*

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज। *—(गीता १८।६६)*

सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिन्तनम्।
आसनं तद्विजानीयान्नेतरत्सुखनाशनम्॥
*—(अपरोक्षानुभूति ११२)*

स्वस्तिकं गोमुखं पद्मं हंसाख्यं ब्रह्मनामकम्।
नृसिंहं गरुडं कूर्मं नागाख्यं वैद्युतासनम्॥

वीम्रं मयूरवज्राख्यं सिद्धाख्यं रौद्रमासनम्।
योन्यासनं विदुः शाक्तं पूर्वपश्चिमतानकम्॥

निरालम्बनयोगस्य निरालम्बनमासने॥
*—(मानसोल्लास ९।२४-२६)*

निष्क्राम्य नासाविवरादशेषं प्राणं बहिः शून्यमिवानिलेन।
निरुध्य सन्तिष्ठति रुद्धवायुः स रेचको नाम महानिरोधः॥
*—(भास्वती २।५०)*

बाह्यस्थितं घ्राणपुटेन वायुमाकृष्य तेनैव शनैः समन्तात्।
नाडीश्च सर्वाः परिपूरयेद्यः स पूरको नाम माहानिरोधः॥
*—(भास्वती २।५०)*

न रेचको नैव च पूरकोऽत्र नासापुटे संस्थितमेव वायुम्।
सुनिश्चलं धारयति क्रमेण कुम्भाख्यमेतत् प्रवदन्ति तज्ज्ञाः॥
*—(भास्वती २।५०)*

रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणम्।
प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः॥
*—(योगवार्त्तिक २।४९ में उद्धृत)*

चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात्।
निरोधः सर्ववृत्तीनां प्राणायामः च उच्यते॥

NOTES

**निषेधनं प्रपञ्चस्य रेचकाख्यः समीरणः।**
**ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः॥**

**ततस्तद्वृत्तिनैश्चल्यं कुम्भकः प्राणसंयमः।**
**अयञ्चापि प्रबुद्धानामज्ञानां घ्राणपीडनम्॥**

**शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित्।**
**कुर्याच्चित्तानुकारीणि प्रत्याहारपरायणः॥**

**विषयेष्वात्मतां दृष्ट्वा मनसश्चिति मज्जनम्।**
**प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः॥**

**यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात्।**
**मनसो धारणं चैव धारणा सा परा मता॥**

**प्राणायामैर्द्वादशभिर्यावत्कालः कृतो भवेत्।**
**स तावत्कालपर्य्यन्तं मनो ब्रह्मणि धारयेत्॥**

**ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः।**
**ध्यानशब्देन विख्याता परमानन्ददायिनी॥**

[१]अस्याङ्गिनो निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति। लयस्तावदखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा। अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः। लयविक्षेपाभावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं कषायः। अखण्डवस्त्वनवलम्बनेनापि[२] चित्तवृत्तेः सविकल्पकानन्दास्वादनं रसास्वादः। समाध्यारम्भसमये सविकल्पकानन्दास्वादनं वा। अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा तदा निर्विकल्पकः समाधिरित्युच्यते। तदुक्तम्–

**"लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः।**
**सकषायं विजानीयाच्छमप्राप्तं न चालयेत्॥**

**नास्वादयेद्रसं तत्र निस्सङ्गः प्रज्ञया भवेत्।" इति,**
**"यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।"**

**इति च॥ ६४॥**

---

१. ''**एवमस्याङ्गिनो**'' इति पाठान्तरम्।
२. ''**अखण्डवस्त्वनवलम्बनेऽपि**'' इति पाठान्तरम्।

NOTES

यथा निधिग्रहणाय प्रवृत्तस्य निधिपरिपालकभूतप्रेताद्यावृतस्य निधिप्राप्त्यभावेऽपि भूताद्यनिष्टनिवृत्तिमात्रेण कोऽपि महानानन्दो भवति, तथा सविकल्पकसमाधावखण्डवस्त्वनवलम्बनेन नित्यानन्दरसास्वादनाभावेऽप्यनिष्टबाह्यप्रपञ्चनिवृत्तिजन्यानन्दं सविकल्परूपं ब्रह्मानन्दभ्रमेणास्वादयति तद्रसास्वादनमित्यर्थः।

*–(सुबोधिनी)*

**मग्नस्याब्धौ यथाक्षाणि विह्वलानि तथास्य धीः।**
**अखण्डैकरसं श्रुत्वा निष्प्रचारा बिभेत्यतः॥**

**गौडाचार्या निर्विकल्पे समाधावन्ययोगिनाम्।**
**साकारब्रह्मनिष्ठानामत्यन्तं भयमूचिरे॥**

*–विद्यारण्यस्वामीने पञ्चदशी (२/२७-२८)*

**अस्पर्शयोगो वै नाम दुर्दर्शः सर्वयोगिभिः।**
**योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः॥**

*–आचार्य गौडपादकी कारिका (३/३९)*

**सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः।**
**मनसैवेन्द्रियग्रामं विनियम्य समन्ततः॥**

**शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया।**
**आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्॥**

**यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।**
**ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥**

*–भगवान् श्रीकृष्ण श्रीमद्भगवद्गीता (६/२४-२६)*

**निश्चलं निश्चरच्चित्तमेकीकुर्यात् प्रयत्नतः।**

*–माण्डूक्यकारिका (3/४५)*

**यदा न लीयते चित्तं न च विक्षिप्यते पुनः।**
**अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा॥**

**मनोदृश्यमिदं द्वैतं यत्किञ्चित्सचराचरम्।**
**मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते॥**

अथ जीवन्मुक्तलक्षणमुच्यते। जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृतेऽज्ञानतत्कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः।

NOTES

**"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**
**क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥"**

**इत्यादिश्रुतेः॥ ६५॥**

**अन्वयः**—तस्मिन् परावरे दृष्टे अस्य हृदयग्रन्थिः भिद्यते, सर्वसंशयाः छिद्यन्ते, कर्माणि च क्षीयन्ते।

**यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।**
**ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥**

अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेणान्ध्यमान्द्या-पटुत्वादिभाजनेनेन्द्रियग्रामेणाशनायापिपासाशोकमोहादिभाजनेनान्तःकरणेन च पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यति। यथेन्द्रजालमिदमिति ज्ञानवांस्तदिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति। "सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव" इत्यादिश्रुतेः। उक्तं च—

**"सुषुप्तवज्जाग्रति यो न पश्यति**
**द्वयं च पश्यन्नपि चाद्वयत्वतः।**
**तथा च कुर्वन्नपि निष्क्रियश्च यः**
**स आत्मविन्नान्य इतीह निश्चयः॥" इति॥ ६६॥**

**अन्वयः**—यः अद्वयत्वतः जाग्रति द्वयं पश्यन्नपि सुषुप्तवत् न पश्यति, तथा च कुर्वन्नपि यः निष्क्रियः, सः आत्मवित्, अन्यः न इति इह निश्चयः।

**ज्ञानोदयात् पुरारब्धं कर्म ज्ञानान्न नश्यति।**
**अदत्वा स्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत्॥**

**व्याघ्रबुद्ध्या विनिर्मुक्तो बाणः पश्चात्तु गोमतौ।**
**न तिष्ठति छिनत्त्येव लक्ष्यं वेगेन निर्भरम्॥**

*—शङ्कराचार्य विवेकचूडामणि (४५२, ४५३)*

"अपि च नैवात्र विवदितव्यं ब्रह्मविदा कञ्चित्कालं शरीरं ध्रियते, न वा ध्रियत इति। कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणं चापरेण प्रविक्षेप्तुं शक्येत।" *—(ब्रह्मसूत्रशाङ्करभाष्य ४।१।१५)*

अस्य ज्ञानात्पूर्वं विद्यमानानामेवाहारविहारादीनामनुवृत्तिवच्छुभवासनानामेवानु-वृत्तिर्भवति शुभाशुभयोरौदासीन्यं वा। तदुक्तम्—

NOTES

**"बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि।**
**शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे॥" इति॥**
**"ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः॥" इति च॥**

तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालङ्कारवदनुवर्तन्ते। तदुक्तम्—

**"उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः।**
**अयत्नतो भवन्त्यस्य न तु साधनरूपिणः॥" इति॥ ६७॥**

**निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्।**
**अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः॥**

*—(वेदव्यास महाभारत १२/९४३०)*

**यो हि यत्र विरक्तः स्यान्नासौ तस्मिन् प्रवर्त्तते।**
**लोकत्रयाद्विरक्तत्वान्मुमुक्षुः किमितीहते॥**

**क्षुधया पीड्यमानोऽपि न विषं ह्यत्तुमिच्छति।**
**मिष्टान्नध्वस्ततृड् जानन्नामूढस्तज्जिघत्सति॥**

**रागो लिङ्गमबोधस्य चित्तव्यायामभूमिषु।**
**कुतः शाद्वलता तस्य यस्याग्निः कोटरे तरोः॥**

*—(नैष्कर्म्यसिद्धि ५/६५-६७)*

किं बहुनायं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः संस्तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणे लीने सत्यज्ञानतत्कार्यसंस्कारणामपि विनाशात् परमकैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डब्रह्मावतिष्ठते। "न तस्य प्राणा उत्क्रामन्ति", "अत्रैव [१]समवलीयन्ते", "विमुक्तश्च विमुच्यते" इत्यादिश्रुतेः॥ ६८॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यसदानन्दविरचितो वेदान्तसारः समाप्तः॥

**यस्मिन्देहे दृढं ज्ञानमपरोक्षं विजायते।**
**तद्देहपातपर्य्यन्तमेव संसारदर्शनम्॥**

**पुरापि नास्ति संसारदर्शनं परमार्थतः।**
**कथं तद्दर्शनं देहविनाशादूर्ध्वमुच्यते॥**

---

१. "**समवनीयन्ते**" इति पाठभेदः।

NOTES

**तस्माद् ब्रह्मात्मविज्ञानं दृढं चरमविग्रहे।**
**जायते मुक्तिदं ज्ञानं प्रसादादेव मुच्यते।।**

*–(सूतसंहिता ३/७/७६-७८)*

करामलकवदधिगतसकलशास्त्रपुराणेतिहासरहस्यानामपि वेदान्तविद्यैकनीडानां निजावदातचरितवैदुष्पवैदग्ध्यविमलीकृतवसुन्धराणां ब्रह्मवर्चसदेदीप्यमानबाह्याभ्यन्तराणां बृहदारण्यकोक्तब्राह्मणत्वमापन्नानां दर्शनमात्रेणैव शमप्रदायिनामाचार्यप्रवराणां गुरुवर्याणां चरणेष्वधीतशास्त्रः, निजविद्याविनयप्रथिते शासनाध्यापनादिगुरुकर्मार्जितयशसि श्रीवास्तव्यकायस्थविमलवंशे समुद्भूतानां स्वाभिमानैकधनानां वैरिविनाशनेऽवधीरितकौटिल्यानां सम्पत्सु विपत्सु च समदृष्टीनां भगवच्चरणारविन्देष्वर्पितसकलमनोवृत्तीनां पारेऽशीतिजीविनां सम्प्रति दिवमुपेयुषां श्रीमद्रघुवरदयालसूनूनां श्रीमतां मन्नालालेत्याह्वयानां तातपादानां कनीयानात्मजः, बिलग्रामवासिकायस्थकुलकाञ्चननिकषभूतश्रीमद्हीरालालमहोदयानां तुरीयात्मजायां श्रीमत्यां रत्नदेवीतिप्रख्यातान्वर्थाभिधानायां जातः, कान्यकुब्ज (कन्नौज) नगराद् दक्षिणतः पञ्चमक्रोशवर्त्तिचँदियापुरग्रामवास्तव्यः श्रीवास्तव्यः सन्तनारायणोऽत्यल्पविद्याबुद्धिरपि वेदान्तपरिशीलनलोलुपः स्वान्तःसुखाय सतां विदुषां च विनोदाय छात्राणां हिताय चेमां तत्त्वपारिजाताभिधां वेदान्तसारव्याख्यां वैक्रमीये सहस्रद्वयात्परतः पञ्चविंशतितमे संवत्सरे मातृनवम्यां ब्राह्ममुहूर्त्ते सम्पूर्णत्वमगमयत्।

❖❖❖

NOTES

UNIT–V

# इकाई–पञ्चम

# प्रत्यभिज्ञा-दर्शनम्

**स्वच्छन्दतः सृजति संसृतिमीश्वरोऽयं,**
**भावान्विभासयति चात्मनि विम्बरूपान्।**
**अद्वैतरूपविदितं नवतत्त्वमत्र**
**साक्षात्कृतिं दिशति तत्परमं समीहे॥ ऋषिः।**

## १. प्रत्यभिज्ञा-दर्शन का स्वरूप

अत्रापेक्षाविहीनानां जडानां कारणत्वं दुष्यतीत्यपरितुष्यन्तो, मतान्तरमन्विष्यन्तः परमेश्वरेच्छावशादेव जगन्निर्माणं परिघुष्यन्तः, स्वसंवेदनोपपत्त्या आगमसिद्ध-प्रत्यगात्मतादात्म्ये नानाविधमानमेयादिभेदाभेदशालिपरमेश्वरोऽनन्यमुखप्रेक्षित्व-लक्षणस्वातन्त्र्यभाक् स्वात्मदर्पणे भावान्प्रतिबिम्बवद् अवभासयतीति भणन्तो, बाह्याभ्यन्तरचर्याप्राणायामातिक्लेशप्रयासकलापवैधुर्येण सर्वसुलभमभिनवं प्रत्यभिज्ञामात्रं परापरसिद्ध्युपायमभ्युगच्छन्तः, परे माहेश्वराः प्रत्यभिज्ञाशास्त्रमभ्य-स्यन्ति।

## २. प्रत्यभिज्ञा-दर्शन का साहित्य

**तस्येयत्तापि न्यरूपि परीक्षकैः–**

१. **सूत्रं वृत्तिर्विवृतिर्लघ्वी बृहतीत्युभे विमर्शिन्यौ।**
**प्रकरणविवरणपञ्चकमिति शास्त्रं प्रत्यभिज्ञायाः॥**

NOTES

# ३. प्रथम सूत्र की व्याख्या

**तत्रेदं प्रथम सूत्रम्–**

२. **कथंचिदासाद्य महेश्वरस्य दास्यं जनस्याप्युपकारमिच्छन्।**
**समस्तसम्पत्समवाप्तिहेतुं तत्प्रत्यभिज्ञामुपपादयामि।। इति।।**

कथञ्चिदिति–परमेश्वराभिन्नगुरुचरणारविन्दयुगलसमाराधनेन परमेश्वरघटितेन एवेत्यर्थः। आसाद्येति–आ समन्तात्परिपूर्णतया सादयित्वा, स्वात्मोपभोग्यतां निर्गलां गमयित्वा। तदनेन विदितवेद्यत्वेन परार्थशास्त्रकरणेऽधिकारो दर्शितः। अन्यथा प्रतारणमेव प्रसज्येत।

मायोत्तीर्णा अपि महामायाधिकृता विष्णुविरिञ्चयाद्या यदीयैश्वर्यलेशेन ईश्वरीभूताः स भगवाननवच्छिन्नप्रकाशानन्दस्वातन्त्र्यपरमार्थो महेश्वरः। तस्य दास्यम्। दीयतेऽस्मै स्वामिना सर्वं यथाभिलषितमिति दासः। परमेश्वरस्वरूप-स्वातन्त्र्यपात्रमित्यर्थः।

जनशब्देनाधिकारिविषयनियमाभावः प्रादर्शि। यस्य यस्य हीदं स्वरूपकथनं तस्य तस्य महाफलं भवति। प्रज्ञानस्यैव परमार्थफलत्वात्। तथोपदिष्टं शिवदृष्टौ परमगुरुभिर्भगवत्सोमानन्दनाथपादैः–

२. **एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः।**
**ज्ञाते शिवत्वे सर्वस्थे प्रतिपत्त्या दृढात्मना।।**

४. **करणेन नास्ति कृत्यं क्वापि भावनयाऽपि वा।**
**ज्ञाते सुवर्णे करणं भावनां वा परित्यजेत्।। इति।।**

## ३. क. 'अपि' और 'उप' शब्दों के अर्थ

अपिशब्देन स्वात्मनस्तदभिन्नतामाविष्कुर्वता पूर्णत्वेन स्वात्मनि परार्थसम्पत्त्यतिरिक्तप्रयोजनान्तरावकाशश्च पराकृतः। परार्थश्च प्रयोजनं भवत्येव। तल्लक्षणयोगात्। न ह्ययं देवशापः 'स्वार्थ एव प्रयोजनं न परार्थ' इति। अत एवोक्तमक्षपादेन–'यमर्थधिकृत्य प्रवर्तते तत्प्रयोजनम्–(गौ. सू. १.१.२४) इति।'

उपशब्दः सामीप्यार्थः। तेन जनस्य परमेश्वरसमीपताकरणमात्रं फलम् अत एवाह–समस्तेति। परमेश्वरतालाभे हि सर्वाः सम्पदस्तन्निष्यन्दमय्यः सम्पन्ना एव, रोहणाचललाभे रत्नसम्पद इव। एवं परमेश्वरतालाभे किमन्यत्प्रार्थनीयम्?

**तदुक्तमुत्पलाचार्यैः–**

**६. भक्तिलक्ष्मीसमृद्धानां किमन्यदुपयाचितम्।**
**एतया वा दरिद्राणां किमन्यदपयाचितम्॥ इति॥**

इत्थं षष्ठीसमासपक्षे प्रयोजनं निर्दिष्टम्। बहुव्रीहिपक्षे तूपपादयामः।

समस्तस्य बाह्याभ्यन्तरस्य नित्यसुखादेर्या सम्पत्सिद्धिः तथात्वप्रकाशः, तस्याः सम्यगवाप्तिर्यस्याः प्रत्यभिज्ञायाः हेतुः सा तथोक्ता। तस्य महेश्वरस्य प्रत्यभिज्ञा, प्रति आभिमुख्येन, ज्ञानम्। लोके हि स एवायं चैत्र इति प्रतिसन्धानेनाभिमुखीभूते वस्तुनि ज्ञानं प्रत्यभिज्ञेति व्यवह्रियते। इहापि प्रसिद्धपुराणसिद्धागमानुमानादिज्ञातपरिपूर्णशक्तिके परमेश्वरे सति स्वात्मनि अभिमुखीभूते तच्छक्तिप्रतिसन्धानेन ज्ञानमुदेति नूनं स एवेश्वरोऽहमिति।

तामेतां प्रत्यभिज्ञामुपपादयामि। उपपत्तिः सम्भवः, सम्भवतीति। तत्समर्थाचरणेन प्रयोजकव्यापारेण सम्पादयामीत्यर्थः।

## ४. प्रत्यभिज्ञा के प्रदर्शन की आवश्यकता

यदीश्वरस्वभाव एवात्मा प्रकाशते, तर्हि किमनेन प्रत्यभिज्ञाप्रदर्शनप्रयासेनेति चेत्–तत्रायं समधिः। स्वप्रकाशतया सततमवभासमानेऽप्यात्मनि मायावशाद् भागेन प्रकाशमाने पूर्णतावभाससिद्धये दृकक्रियात्मकशक्त्याविष्करणेन प्रत्यभिज्ञा प्रदर्श्यते।

तथा च प्रयोगः 'अयमात्मा परमेश्वरो भवितुमर्हति। ज्ञानक्रियाशक्तिमत्त्वात्। यो यावति ज्ञाता कर्ता च स तावतीश्वरः प्रसिद्धेश्वरवद्राजवद्वा। आत्मा च विश्वज्ञाता कर्ता च। तस्मादीश्वरोऽयम्' इति। अवयवपञ्चकस्याश्रयणं मायावदेव नैयायिकमतस्य कक्षीकारात्।

**तदुक्तमुदयाकरसूनुना–**

**७. कर्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे।**
**अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः॥**

**८. किं तु मोहवशादस्मिन्दृष्टेऽप्यनुपलक्षिते।**
**शक्त्याविष्करणेनेयं प्रत्यभिज्ञोपदर्श्यते॥**

## ५. ज्ञानशक्ति और क्रियाशक्ति

तथा हि–

९. सर्वेषामिह भूतानां प्रतिष्ठा जीवदाश्रया।
ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतम्॥

१०. तत्र ज्ञानं स्वतःसिद्धं क्रिया कार्याश्रिता सती।
परैरप्युपलक्ष्येत तथान्यज्ज्ञानमुच्यते॥ इति॥

११. या चैषां प्रतिभा तत्तत्पदार्थक्रमरूपिता।
अक्रमानन्दचिद्रूपः प्रमाता स महेश्वरः॥ इति च॥

सोमानन्दनाथपादैरपि–

सदा शिवात्मना वेत्ति सदा वेत्ति मदात्मना। इत्यादि

ज्ञानाधिकारपरिसमाप्तावपि–

१२. तदैक्येन विना नास्ति संविदां लोकपद्धतिः।
प्रकाशैक्यात्तदेकत्वं मातैकः स इति स्थितिः॥

१३. स एव विमृशत्वेन नियतेन महेश्वरः।
विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः॥ इति॥

## ६. वस्तुओं का प्रकाशन–आभासवाद

विवृतं चाभिनवगुप्ताचार्यैः। 'तमेव भान्तमनुभाति सर्वं, तस्य भासा सर्वमिदं विभाति' (काठक. २.२) इति श्रुत्या प्रकाशचिद्रूपमहिम्ना सर्वस्य भावजातस्य भासकत्वमभ्युपेयते। ततश्च विषयप्रकाशस्य नीलप्रकाशः पीतप्रकाश इति विषयोपरागभेदाद्भेदः। वस्तुतस्तु देशकालाकारसंकोचवैकल्यादभेद एव। स एव चैतन्यरूपः प्रकाशः प्रमातेत्युच्यते।

तथा च पठितं शिवसूत्रेषु–'चैतन्यमात्मा' (१.१) इति। तस्य चिद्रूपत्व-मनवच्छिन्नविमर्शत्वमनन्योन्मुखत्वमानन्दैकघनत्वं माहेश्वर्यमिति पर्यायः। स एव ह्ययं भावात्मा विमर्शः शुद्धे पारमार्थिक्यौ ज्ञानक्रिये। तत्र प्रकाशरूपता ज्ञानम्। स्वतो जगन्निर्मातृत्वं क्रिया।

NOTES

**तच्च निरूपितं क्रियाधिकारे–**

**१४. एष चानन्तशक्तित्वादेवमाभासयत्यमून्।**
**भावानिच्छावशादेषां क्रिया निर्मातृतास्य सा॥ इति॥**

**उपसंहारेऽपि–**

**१४. इत्थं तथा घटपटाद्याकारजगदात्मना।**
**तिष्ठासोरेवमिच्छैव हेतुकर्तृकृता क्रिया॥ इति॥**

# ७. ईश्वर की इच्छा से संसारोत्पत्ति

**१६. तस्मिन्सतीदमस्तीति कार्यकारणताऽपि या।**
**साप्यपेक्षाविहीनानां जडानां नोपपद्यते॥**

इति न्यायेन यतो जडस्य न कारणता न वाऽनीश्वरस्य चेतनस्यापि, तस्मात्तेन तेन जगद्गतजन्मस्थित्यादिभावविकारतत्तद्भेदक्रियासहस्त्ररूपेण स्थातुमिच्छोः स्वतन्त्रस्य भगवतो महेश्वरस्येच्छैव उत्तरोत्तरमुच्छूनस्वभावा क्रिया विश्वकर्तृत्वं वोच्यत इति।

इच्छामात्रेण जगन्निर्माणमित्यत्र दृष्टान्तोऽपि स्पष्टं निर्दिष्टः–

**१७. योगिनामपि मृद्बीजे विनैवेच्छावशेन यत्।**
**घटादि जायते तत्तत्स्थिरभावक्रियाकरम्॥ इति॥**

यदि घटादिकं प्रति मृदाद्येव परमार्थतः कारणं स्यात्तर्हि कथं योगीच्छामात्रेण घटादिजन्म स्यात्? अथोच्येत–अन्य एव मृद्बीजादिजन्या घटाङ्कुरादयो, योगीच्छाजन्यास्त्वन्य एवेति। तत्रापि बोध्यसे–सामग्रीभेदात्तावत्कार्यभेद इति सर्वजनप्रसिद्धम्।

# ८. उपादान कारण और पदार्थों की उत्पत्ति

ये तु वर्णयन्ति नोपादानं विना घटाद्युत्पत्तिरित, योगी त्विच्छया परमाणून्व्यापारयन् संघटयतीति तेऽपि बोधनीयाः। यदि परिदृष्टकार्यकारणभाव-विपर्ययो न लभ्येत तर्हि घटे मृद्दण्डचक्रादिदेहे स्त्रीपुरुषसंयोगादि सर्वमपेक्ष्येत। तथा च योगीच्छासमनन्तरसंजातघटदेहादिसंभवो दुःसमर्थ एव स्यात्।

NOTES

चेतन एव तु तथा भाति, भगवान् भूरिभगो महादेवो नियत्यनुवर्तनोल्लङ्घन-तरस्वातन्त्र्य इति पक्षे न काचिदनुपपत्तिः। अत एवोक्तं वसुगुप्ताचार्यैः–

१८. **निरुपादानसंभारमभित्तावेव तन्वते।**
**जगच्चित्रं नमस्तस्मै कलानाथाय शूलिने।। इति।।**

## ९. विभिन्न प्रश्न-जीव और संसार का सम्बन्ध

ननु प्रत्यगात्मनः परमेश्वराभिन्नत्वे संसारसम्बन्धः कथं भवेदिति चेत्–तत्रोक्तमागमाधिकारे–

१९. **एष प्रमाता मायान्धः संसारी कर्मबन्धनः।**
**विद्यादिज्ञापितैश्वर्यश्चिद्घनो मुक्त उच्यते।। इति।।**

## १. क. प्रमेय को लेकर बद्ध और मुक्त में भेद

ननु प्रमेयस्य प्रमात्रभिन्नत्वे बद्धमुक्तयोः प्रमेयं प्रति को विशेषः? अत्राप्युत्तरमुक्तं तत्त्वार्थसंग्रहाधिकारे–

२०. **मेयं साधारणं मुक्तः स्वात्माभेदेन मन्यते।**
**महेश्वरो यथा बद्धः पुनरत्यन्तभेदवत्।। इति।।**

## १०. प्रत्यभिज्ञा की आवश्यकता–अर्थक्रिया में भेद

ननु आत्मनः परमेश्वरत्वं स्वाभाविकं चेन्नार्थः प्रत्यभिज्ञाप्रार्थनया। न हि बीजमप्रतिज्ञातं सति सहकारिसाकल्येऽङ्कुरं नोत्पादयति। तस्मात्कस्माद्वात्मप्रत्यभिज्ञाने निर्बन्ध इति चेत्–

उच्यते। शृणु तावदिदं रहस्यम्। द्विविधा ह्यर्थक्रिया-बाह्याङ्कुरादिका, प्रमातृविश्रान्तिचमत्कारसारा प्रीत्यादिरूपा च। तत्राद्या प्रत्यभिज्ञानं नापेक्षते। द्वितीया तु तदपेक्षत एव।

इहाप्यहमीश्वर इत्येवंभूतचमत्कारसारा परापरसिद्धिलक्षणजीवात्मैकत्व-शक्तिविभूतिरूपार्थक्रियेति स्वरूपप्रत्यभिज्ञानमपेक्षणीयम्।

ननु प्रमातृविश्रान्तिसाराऽर्थक्रिया प्रत्यभिज्ञानेन विना अदृष्टा सती तस्मिन्दृष्टेति क्व दृष्टम्? अत्रोच्यते–नायकगुणगणसंश्रवणप्रवृद्धानुरागा काचन कामिनी

NOTES

मदनविह्वला विरहक्लेशमसहमाना मदनलेखावलम्बनेन स्वावस्थानिवेदनानि विधत्ते। तथा वेगात्तन्निकटमटन्त्यपि तस्मिन्नवलोकितेऽपितदवलोकनं तदीयगुण-परामर्शाभावे जनसाधारणत्वं प्राप्ते हृदयङ्गमभावं न लभते। यदा तु दूतीवचनात् तदीयगुणपरामर्शं करोति तदा तत्क्षणमेव पूर्णभावमभ्येति।

एवं स्वात्मनि विश्वेश्वरात्मना भासमानेऽपि तन्निर्भासनं तदीयगुणपरामर्श-विरहसमये पूर्णभावं न सम्पादयति। यदा तु गुरुवचनादिना सर्वज्ञत्वसर्वकर्तृत्वा-तिलक्षणपरमेश्वरोत्कर्षपरामर्शो जायते तदा तत्क्षणमेव पूर्णात्मतालाभः।

## ११. उपसंहार

**तदुक्तं चतुर्थे विमर्शे–**

२१. **तैस्तैरप्युपयाचितैरुपनतस्तस्याः स्थितोऽप्यन्तिके**
**कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा।**
**लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो**
**नैवायं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता॥**

*–(ई. प्र. ४.२.२) इति।*

अभिनगुप्तादिभिराचार्यैर्विहितप्रतानोऽप्ययमर्थः संग्रहमुपक्रममाणैरस्मा-भिर्विस्तरभिया न प्रतानित इति सर्वं शिवम्।

इति श्रीमत्सायणमाधवीये सर्वदर्शनसंग्रहे प्रत्यभिज्ञादर्शनम्।।

❖❖❖